No. ४०८६

Title राम निबन्धः

Author श्री क्षेमराजः

Extent १५० Age १८४१

Subject धर्मशास्त्रं

रामनिवन्ध पत्राणि १५०

प्रेषयामासेमंश्रीहवाद्रमङ्गलसिंहः

रा॰नि॰
१

॥श्रीगणेशायनमः॥श्रीमोहनलालजीसहायः॥गुरुंनत्वा
चवाग्देवींविज्ञानंकालनिर्णयं॥हेमरामेणरामाख्यानिबंधोयम
काश्यते॥१॥अथतिथिर्द्विधापूर्णाखंडा॥तत्रस्कांदे॥प्रतिपत्प्रभृ
तयः॥सर्वाउदयादोदयाद्रवेः॥संपूर्णाइतिविख्याताहस्वि
सर्ववर्जिताः॥हरिवासरएकादशी॥तत्रवेधांतरंवक्ष्यते॥त
द्भिन्नाखंडातद्द्वधमाह॥पैठीनसीः पक्षयेपितिथयःतिथिंपू
र्णांतयोजनं॥त्रिभिर्मुहूर्तैर्विद्धांतिसामान्योयंविधिःस्मृतः॥

दत्तः॥ त्रिमुहूर्त्तानकर्त्तव्यायातिथिःक्षयगामिनी॥ त्रिमुहूर्त्ता
पिकर्त्तव्यायातिथिर्वृद्धिगामिनी॥ शिवरहस्ये॥ यांप्राप्यास्तमु
पैत्यर्कः॥ साचेत्स्यात्त्रिमुहूर्त्तगा॥ धर्मकृत्येषुसर्वेषुसंपूर्णांतां
विदुर्बुधाः॥ विष्णुधर्मोत्तरे॥ उदितेदैवतंभानौपित्र्यंचास्तमितेर
वौ॥ द्विमुहूर्त्तंत्रिरह्नश्चसातिथिर्हव्यकव्ययोः॥ पाद्मे॥ व्रतोपवा
सनियमेघटिकैकापियाभवेत्॥ उदितेसातिथिस्तत्रविपरीतातु
पैतृके॥ तिथितत्वे॥ षष्टिदंडात्मिकायास्तुतिथेर्निष्क्रमणेपरे॥

गा॰नि॰
२

2

अकर्मण्यंतिथिमलंविंद्यादेकादशींविना॥इतिएकादशीपराति
स्कांदे॥नागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा॥भूतोष्टादश
नाडीभिर्दूषयत्युत्तरांतिथिं॥नाग:॥पंचमीदिक्दशमीभूत:
चतुर्दशी॥इतिवेध:॥कर्मणोयस्यय:कालस्तत्कालव्यापिनी
तिथि:॥तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणं॥गार्ग्य:॥दि
वारात्रिव्रतंयच्च॥एकमेकतिथौगतं॥तस्यामुभययोगिन्यामा
चरेनद्व्रतंव्रती॥निगमेयुग्मानियुगभूतानांषण्मुन्योर्वसुरंध्रयो: २

रुद्रेणद्वादशी।युक्ता।चतुर्दश्याचपूर्णिमाप्रतिपद्यप्यमावास्या
तिथ्योर्युग्मंमहाफलं॥एतद्व्यस्तंमहादोषंहंतिपुण्यंपुराकृतं॥
तिथ्योर्युग्मद्वितीयातृतीयाचतुर्थ्युतेतिएवंचतुर्थीपंचम्यादीनां
युग्मानीति॥यत्तुषष्ठ्यष्टम्यप्यमावास्याकृष्णपक्षेचतुर्दशी॥एताः
परयुताःपूज्याःपराःपूर्वेणसंयुता॥इतियुग्मवाक्यं॥यत्तुप्रतिप
त्सद्वितीयास्याद्द्वितीयाप्रतिपद्युतेति॥यत्तु॥चतुर्थीसंयुतायाच
फर सातृतीयाफलप्रदेतितद्विरुद्धं॥अनयोश्चपक्षभेदेनव्यवस्था

विस्वधर्मोत्तरे ॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ॥ कृ

रा०नि० ष्णपक्षे तिथिर्ग्राह्या यस्यामस्तंगतो रविः ॥ अयं युग्मवाक्यानि

३ र्णयो दैवकर्मणि पित्र्ये तु पूर्वोक्तपक्षे पूजने ॥ एवं वेदपंस्तथा

हिंसा त्रिविधं निषिद्धलक्षणं ॥ एवं दर्पौ परो पूज्यो हिंसा स्यात्पू

र्वकालिकी ॥ एवं वासमागतिर्ज्ञेया दर्पाहृड्डिकरी स्मृता ॥ तयमा

दिषु ॥ एकोदिष्ट्यादिदिष्ट्यादौ क्रामहृष्यादि ॥ चोदने देवलः ॥ ३

या तिथिं समनुप्राप्य उदयं याति भास्करः ॥ सा तिथिः सकला ज्ञे

स्नानदानजपादिषु स्कांदे यांतिथिंसमनुप्राप्य यात्यस्तं पद्मिनीपतिः

यां॥स्नानाध्ययनकर्मसु॥तत्रापवादः॥मन्वादौचयुगादौचग्रह सातिथिःस

णेचंद्रसूर्ययोः॥व्यतीपातेवैधृतौचतत्कालव्यापिनीतिथिः॥ कला ज्ञेया।१

अभ्यंगेचादधिस्नानेमैथुनेदंतधावने॥जातेचमरणेचैवतत्का

लव्यापिनीतिथिं॥अथनिमेषादिमानं॥गार्ग्यः॥पत्रपत्मप

रिक्षेपान्निमेषःपरिकीर्तितः॥द्वौनिमेषौत्रुटिःसंज्ञाद्वेत्रुटीतु

लवःस्मृतः॥द्वौलवौलवनस्तुक्तः॥कलाश्रोकाष्ठभिस्तुणेः॥सा

घटीषष्टिभिस्त्वतासैवघटीतुमुहूर्तकं॥तेतुत्रिंशादहोरात्र॥

इतिगार्ग्येणभाषितं ॥ अथाह्नःकालमाहव्यासः ॥ मुहूर्त्तत्रितयं
प्रातस्तावनेवतुसंगमः ॥ मध्याह्नस्त्रिमुहूर्त्तःस्यादपराह्णोपिता
दृशः ॥ सायाह्नस्त्रिमुहूर्त्तस्स्यपंचधाकालउच्यते ॥ ततःपरंच ॥
सायंसंध्याद्वियटिकाह्यस्ताद्रुपरिभास्वतः ॥ आहारंमैथुनंनिद्रा
स्वाध्यायंतत्रवर्जयेत् ॥ अथैकभक्तंदेवलः ॥ दिनार्द्धसमयेतीते
भुज्यते ॥ नियमेनयत् ॥ एकभक्तमपिप्रोक्तंसूत्रंग्राम्त्रयेणतु ॥ म
ध्याह्नव्यापिनीग्राह्याएकभुक्तव्रतेतिथिरितिबौधायनं ॥ अ

थनक्तंव्यासः॥ त्रिमुहूर्त्तप्रदोषःस्याद्भानावस्तंगतेसतिनक्तंतु
त्रप्रकुर्वीत॥ इतिव्यासस्यनिश्चयः॥ प्रदोषव्याप्त्यभावेस्कांदे
प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते॥ सएव॥ आत्मनोद्विगु
णच्छायामंदीभूतेदिवाकरे॥ तंनक्तंनक्तमित्याहुर्ननक्तंनिशि
भोजनं॥ एवंज्ञात्वाततोविद्वान्सायाह्नेतुभुजिक्रियां॥ कुर्यान्न
त्र क्तव्रतीनक्तफलंभवतिनिश्चितमिति॥ सौरनक्ते॥ त्रिमुहूर्त्ते
स्पृगेवाह्निनिशिचैतावतीतिथिः॥ तस्यांसौरंभवेन्नक्तमहन्ये

ए॰नि॰
५

वक्तभोजनं॥स्मृत्यंतरे विशेषः॥यतिश्च विधवा चैव कुर्यान्नक्तं दि
वाकरं॥सदिवाकरमित्युक्तमंतिमे घटिकाद्वये॥अथायाचितं
नायाचितमित्ययाचितं भोजनं॥फलं स्मृत्यंतरे॥अयाचिताशी मि
तभुक्त॥परां सिद्धिमवाप्नुयात्॥अत्र विशेषवचनाभावात्॥उ
पवासनिर्णय॥इति केचित्॥तन्न॥एकभक्तायाचितयोर्यावि
द्वा द्विघटिकावधि॥सा तिथिः सर्वदा ज्ञेया नक्ते सायान्हसंगते ति॥
शार्ङ्गधरीये नारदोक्तेः॥अथ प्रसंगाद्व्रते किंचिदुच्यते समस्तव्रतः

उदयस्यातिथिर्याह्विनभवेद्दिनमध्यगा ॥ मार्कंडेयानव्रतानां समं

स्यादारंभश्चसमापनमिति ॥ व्रतखंडेग्निपुराणे ॥ व्रीहिषष्टिक

मुद्गाः श्चकलायः ॥ सलिलंपयः श्यामाकाश्चैवनीवारागोधूमा

द्याव्रतेहिताः ॥ तथाचस्मृत्यंतरे ॥ चरुभैक्ष्यंसक्तुकणाश्शाकंदधि

घृतंमधुः ॥ श्यामाकाशालिनीवारायावकंमूलतंडुलं ॥ हविष्य

व्रतनक्तादावग्निकार्यादिकेहितं ॥ मधूर्वे ॥ कूष्मांडालाबुवार्तक

पालकाश्मोक्तिकास्तथा ॥ मधुमांसंविहायान्यद्व्रतेचहितमीरि

नं॥ जोन्निकाकोशातकी॥ मधुमधं॥ छंदोगपरिशिष्टे॥ हविष्येषु

रा·नि· यवामुद्गामासदनुव्रीहयःस्मृताः॥ माषकोद्रवगौरादीन्सा

६ वभावेपिवर्जयेत॥ भविष्योत्तरे॥ हैमंतिकंसितास्विन्नंधान्यंमु

द्गास्तिलायवाः॥ कलायकंगुनीवारावास्तूकंहिलमोचिका

ल षष्टिकाकालशाकंचमूलकंकेमुकेतरत॥ कंदंसैंधवसामुद्रेलव

णेमधुसर्पिषी॥ पयोनुद्धृतसारंचपनसाम्रहरीतकी॥ पिप्पली ६

जीरकंचैवनागरंगाकनित्रिणी॥ कदलीलवलीधात्रीफलान्य

गुडमैक्षवं ॥ अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥ मध्वत्र माक्षि
कं ॥ सर्पिः पयश्च गव्यं ॥ अगस्त्यसंहिताप्रोक्तं ॥ हविष्ये नारिकेल
कं स्मृतं नरैः ॥ द्विदलान्वर्जयेन्मुद्गान्विल्वपान्वर्जयेत्तिलान् ॥ सत्व
पान्वर्जयेन्माषान्हविष्यव्रतकर्मसु ॥ अथ द्विदलामाह स्कांदे ॥ माष
मुद्गमसूराश्च चणकाश्च कुलत्थिकाः । निष्पावा राजमाषाश्च आ
ढकी द्विदलं स्मृतं । अथ क्षारमाह पाद्मे ॥ तिलमुद्गादृते शैव्यं सस्य
गोधूमसंभवं ॥ एतत्वं शाकमूलं च एष क्षारगणः स्मृतः ॥ इति ॥ स्वि

८

निषिद्धेवाकाष्ठानांदंतधावने पर्णादिनाविशुद्धेत जिह्वो
ल्लेखंतथैवच अलाभे ४

ग०नि० न्नंध्यासंगोडदेशीयैः॥ क्रियतेशास्त्रानरैः॥ हरिद्रागोरसंधानंचूर्णं
लवणमेवच॥ तथावैचेतवमेतेषुपाकदोषोनविद्यते॥ इद्भवसिष्टः
७ उपवासे॥ तथाश्राद्धेनकुर्याद्दंतधावनं॥ दंतानांकाष्ठसंयोगोदह-
तिसप्तमंकुलानिच॥ पैठीनसिः॥ अलाभेवांदंतकाष्ठानांनिषिद्धायां
तथातिथौ॥ अपांद्वादशगंडूषैर्विदध्याद्दंतधावनं॥ कौर्मे॥ वह्नि-
ग्रीमांतपत्राज्ञानिपतितंचरजस्वलां॥ नस्पृशेन्नाभिभाषेतनेक्षेत ७
मताम्बूलं
व्रतवासरे॥ अथस्मलक्षणमाचारमयूखे॥ सतांबूलंसभोजनमभो

नं ॥ सन्निऽंवाप्यनिष्ठंचव्रतंषट्‌विधलक्षणं ॥ तत्रनिराहारव्रतभंगमु
क्तंविष्णुधर्मोत्तरे ॥ असकृज्जलपानाच्चसकृत्तांबूलभक्षणात् ॥ उप
वासःप्रणश्येतदिवास्वापाच्चमैथुनात् ॥ असकृत्कौतु ॥ असमयेचांबु
पानेननोपवासःप्रणश्यतीति ॥ देवलः ॥ अत्ययेप्राणात्यये ॥ ब्र
ह्मचर्यमहिंसाचसत्यमामिषवर्जनं ॥ व्रतेष्वेतानिचत्वारिकर्तव्या
नीः हस्तारिभिः ॥ आमिषंमासं ॥ तथाचस्मृत्यंतरे ॥ आमिषंहति
पानीयंगोवर्ज्जंक्षीरमामिषं ॥ मत्स्यमामिषंसस्येफलंजंवीरमामि

राम०
८

षं ॥ पञ्चाणामामिषं पर्णैः सर्वं दग्धमनामिषं ॥ इतिश्चर्मपुटकं । पाद्मे
अष्टौतान्यव्रतघ्नानि आपोमूलं फलं पयः ॥ हविर्ब्राह्मणकाम्या ।
च गुरोर्वचनमौषधं ॥ तथा च । सर्वभूतमयं व्याधिः प्रसादो गुरु ।
शासनं ॥ अव्रतघ्नानि पठ्यंते महदेतानि शास्त्रतः ॥ सतापमार्गे
डे ॥ साग्निकः श्रुतपाठी च ब्रह्मचारी तथैव च ॥ अश्नंत एव सिद्ध्यं
ति नैषां सिद्धिरनश्नता । ब्रह्मचारी प्रथमाश्रमी ॥ एभिसहायं व्रतं
कार्यं ॥ काम्योपवासमध्ये च व्यामेरजसि सूतके ॥ काम्यं नामव्रतं ८

कुर्यात्पूजादानविवर्जितं ॥ असामर्थे पठनसि: ॥ भार्यापत्युर्व्रतं कु
र्याद्भार्यायाश्च पतिर्व्रतं ॥ असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते
स्कांदे ॥ पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ॥ एषामभाव एवा
न्यं ब्राह्मणं विनियोजयेत् ॥ वायुपुराणे ॥ स्वयं कर्तुमशक्तश्चेत्कार
येत्स्वपुरोधसा ॥ हिरण्यं दक्षिणां दद्यात्स्वशक्त्या वानुरूपतः ॥ म
दनरत्ने ॥ व्रतं पूर्वं गृहीत्वा यो नाचरेत्काममोहितः ॥ जीवन्भवति
चांडालो मृतः श्वानोभिजायते ॥ इत्यादिसामान्यनिर्णयः ॥ अथा

ग॰नि॰
९

रस्यविशेषतिथीनांनिर्णयस्तत्क्रमेणोच्यते ॥ तत्रप्रथमंप्रतिपदनि
रुक्तिः हेमाद्रौ ॥ तिथीनांप्रवरायस्माद्ब्रह्मणासमुदाहृता ॥ प्रतिप
द्युक्तेपूर्वैप्रतिपन्नेनचोच्यते ॥ तत्रादौप्रतिपन्निर्णीयते ॥ अथचै
त्रशुक्लप्रतिपत्पूर्वविद्धैवग्राह्या ॥ तदुक्तं ॥ वृद्धवसिष्ठः ॥ वत्सरादौ
वसंतादौवलेराज्ये ॥ तथैवच ॥ पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबु
धैरिति ॥ तत्फलंभविष्ये ॥ चैत्रेमासिमहाबाहो ॥ पुण्याप्रतिपदाप ९
रं ॥ यस्तस्यांश्वपचंदृष्ट्वास्नानंकुर्यान्नरोत्तमः ॥ नतस्यदुरितंकिंचि

त्वाधयोव्याधयोनृप ॥ कृत्वाचावश्यकार्याणिसंतर्प्यपितृदेवताः वे-
दयेधूलिकाधूलिंसर्वदुष्टोपशांतये ॥ मंत्रः ॥ वंदितासिसुरेंद्रेणब्र-
ह्मणाशंकरेणच ॥ अतस्त्वंपाहिनोदेविविभूतेभूतिदाभव ॥ ततः
पुराणसमुच्चये ॥ हृतेतुषारसमयेसितपंचदश्यांप्रातर्वसंतसमये
समुपस्थितेच ॥ संप्राश्यचूतकुसुमंसहचंदनेनसत्यंहिपार्थपुरु-
षोथसदासुखीस्यात् ॥ पंचदश्यामतीतायांप्रातरित्यर्थः ॥ अथम
विध्या ॥ येपिबंतिवसंतादौचूतपुष्पंसचंदनं ॥ सत्यंहृत्स्यसकाम-

ग.नि.
१०

स्यकामस्यपूजेयंक्रियतेजनैः। मंत्रोयथा॥ हूतमग्नंवसंतस्यमाकंदकु
सुमंतव॥ सचंदनंपिबाम्यद्यसर्वकामार्थसिद्धये॥ ततः प्रातर्द्वितीः
यायांपुत्रमित्रादिसंयुतः॥ नृपतिर्वितनेदेशेवितानवरशोभिते॥ उ
पविश्यासनेरम्येपौरजानपदैः सह॥ सिंदूरकुंकुमक्षोदपटवासैःस
चंदनैः। विकीर्यलोकांस्तांबूलैःसामान्यंचपृथक्पृथक्॥ नृत्य
गीतविनोदैश्चकुर्यात्कामामहोत्सवं॥ एवंकुर्वन्नवाप्नोतियावत्संव
त्सरंसुखं॥ इदमपिपूर्वविद्धायां॥ चैत्रशुक्लप्रतिपदपिसंवत्सरारंभे १०

उदयव्यापिनीग्राह्याः॥ब्राह्मे॥चैत्रेमासेजगद्ब्रह्मासमसर्जप्रथमेह
नि॥शुक्लपक्षेसमग्रंतुतदासूर्योदयेसति॥दिनद्वयेउदयव्याप्ता
वव्याप्तौवा॥पूर्वैवपूर्वोक्तवृद्धवसिष्ठवचनात्॥तत्रतैलाभ्यंग
मकुर्वाणोनरकंप्रतिपद्यते॥अथशाकादिस्थवर्णज्योतिःशास्त्रे
शाकवत्सरभूपमंत्रिणांरसधान्येश्वरमेघपतीनां॥श्रवणा
त्पठनाच्चवैनृणांशुभतांयातशुभंसदाश्रिया॥तथाचभविष्ये
अतीतेफाल्गुणेमासिप्राप्तेचैत्रमहोत्सवे॥पुण्येऽह्निविप्रक

ग·नि·
११
रा

ष्ठितेऽपादानं समारभेत ॥ न नश्योत्सृजने विद्वान्मंत्रेणानेन मा
नवः ॥ अपेयं सर्वसामान्याङ्गतेभ्यः प्रतिपादिता ॥ अथ समपादना
मितरस्तर्पयेत्तु दि पितामहाः ॥ अनिर्वापं ततो देयं जलं मासचत
ष्टयं ॥ ज्येष्ठशुक्लप्रतिपदि दद्याद्दर्भः ॥ काश्मीरं चेडे ॥ ज्येष्ठमासि सि
तेपक्षे प्राप्य प्रतिपदं तिथिं ॥ दद्यात्स्वमेधिके स्नात्वा मुच्यते सर्वपा
तकैः ॥ एवं सर्वासु तिथिषु क्रमस्नायी भवेन्नरः ॥ आषाढशुक्लपक्षे द ११
शमीं प्रति जन्माद्यमुत्सृजेत ॥ अथाश्विनशुक्लप्रतिपदि नवरात्र

रंभः॥ तदुक्तं हेमाद्रौ धौम्येन॥ आश्विने शुक्लमासे तु कर्तव्यं नव
रात्रकं॥ प्रतिपदादिक्रमेण यावच्च नवमी भवेत्॥ तत्र पूर्वाह्णव्या
श्वि पिनी ग्राह्यास्यां नस्यामितेपक्षे नवरात्रमुपोषितः॥ सुस्नातस्ति
लतैलेन पूर्वाह्णे पूजयेच्छिवां॥ देवीपुराणे शरत्काले महापूजा
क्रियते या च वार्षिकी॥ सा कार्योदयगामिन्यां न तिथ्यैस्तत्र युग्म
ता॥ तत्रोदयगामित्वमपि प्रायः॥ पूर्वाह्णव्यापित्व एव भवति॥ वा
र्षिकीमनेन वत्सरादौ प्रतिपद्युपक्रम्य नवम्यंता पूजाभिधीयते

रा॰नि॰
१२

12

शरद्वसंतयोस्तुल्यएवद्दुर्गोत्सवःकार्यः । यदिकुर्यादमायुक्तप्र
तिपत्स्थापनंमम ॥ तस्यपांसुतंदत्वाभस्मशेषंकरोम्यहं ॥ अग्र पा
ह्वात्कुरुतेयस्तुकलशस्थापनंमम ॥ तस्यसंपद्विनाशःस्यान्न
ष्टःपुत्रोविनश्यति नदर्शकलयायुक्ताप्रतिपच्चंडिकार्चने ॥ उद
येद्विमुहूर्त्तापिग्राह्यासोदयगामिनी ॥ याचाश्वयुजिमासेस्यात्प्र
तियज्ञाद्दयान्विता ॥ शुद्धंसमार्चनंतस्यांशतयज्ञफलंप्रदमिति
मायोगनिषेधकानियानिच ॥ द्वितीयाशेषसंयुक्तामप्रतिपच्चंडिका

चेंने॥ मोहादथोपदेशाद्वाकृतंपुत्रविनाशनं॥ आरंभेनवरात्र
स्यद्वितीयात्रुटिसंयुता॥ नकेवलंतिथिद्वंतिवेधात्सापुत्रसंपद
मित्यादीनिद्वितीयायोगनिषेधकानि। तान्युभयविधान्यपिस
र्वाणिनिर्मूलानि॥ समूलत्वेपिपरस्परंसत्प्रतिपक्षत्वादनिर्णय
कानि॥ चंद्रप्रकाशे॥ प्रातरावाह। येद्देवींप्रातरेवप्रपूजयेत्। प्रातः
प्रातश्चसंपूज्यप्रातरेवविसर्जयेत्॥ इत्युक्तं॥ संतिसंभवेप्रतिपदा
स्याद्यंनाडीषोडशकंमुक्त्वाकलशंस्थापयेत्॥ आद्याःषोडशना

ए·नि·
१३
13

नामस्तुलब्धायःकृतेतेनरः॥कलशाःस्थापनंतत्रत्यनिष्टंना
यतेध्रुवं॥मितिदेवीपुराणवचनात्॥यानितुकलशस्थापनेवै
धृतिचित्रादियोगनिषेधकानिवचनानितानिनिर्मूलानि॥य
था॥प्रतिपद्याश्विनेमासिभवेद्वैधृतिचित्रयोः॥आद्यपादौप
रित्यज्यप्रारभेन्नवरात्रकमितिकात्यायनोक्तेः॥भविष्ये॥चित्रा
वैधृतिसंयुक्ताप्रतिपच्चेद्भवेन्नृप॥नाद्यांशास्त्रयस्त्याद्यास्तु
रीयांशेतुपूजनं॥भद्रायुतायांचेत्प्रतिपत्तुलभ्यतेविरुद्धयोगैरपि

संगतासति ॥ सैवापरान्हे विबुधैर्विधेया स्त्रीपुत्रराज्यादिविवृद्धहे
तुः ॥ अत्र कलशस्थापनं तु दिवैव कार्यं न रात्रौ ॥ तदुक्तं मात्स्ये ॥ न
रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनं ॥ अत्र त्रिरात्रमप्युक्तं हेमा
द्रौ धौम्यमते ॥ त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति ॥ अ
त्र नवरात्रक्रमं महादेवीपुराणे ॥ कन्यासंस्थे रवावीश शुक्लामा
रभ्य नंदिकां ॥ अयाची त्वथ वैकाशी नक्ताशी वाथवाप्यदः ॥ प्रात
स्नायी जितद्वंद्वः त्रिकालं शिवपूजकः ॥ जपहोमसमायुक्तः कन्य

पा॰नि॰
१४

14

कान्भोजयेत्सदा॥ अत्रपूजाकलशेदेव्यावाहनमंत्र॥ दुर्गेदेवि
समागच्छकलशेसन्निधिंकुरु॥ सारदीयामिमांपूजांगृहाण
वरदाभव॥ वसंतेवासंतिकामिनिकल्पनीयं॥ ततो॥ जयंतीमं
गलाकालीतिमंत्रेणावाहुदुर्गेदुर्गेरक्षणिस्वाहेतिनवाक्षरमंत्रेणवा
नवरात्रपर्यंतंपूजाकार्या॥ दशम्यांप्रातर्विसर्जनंतत्रमंत्रः॥ दुर्गे
देविजगन्मातर्मांत्वमस्त्वनमामिते॥ वरदेमेवरंदेहिस्वस्थानंग
च्छपूजिते॥ अत्रमहापूजाचदुर्गोत्सवपुस्तकादवगंतव्येति॥ ॥ १४

देवीपुराणे॥ महात्म्यंभवत्यास्तुपुराणादिषुकीर्तितं॥ पठेच्चश्रु
णुयाद्वापिसर्वकामसमृद्धये॥ अत्रनवरात्रेपाठपरिपाठीमाह
मात्स्ये॥ प्रणवंचादितोजप्त्वास्तोत्रंवावेदमुत्पठेत्॥ अंतेचप्रण
वंजप्त्वापादन्यथाविफलंभवेत्॥ आधारेस्थापयित्वातुपुस्तकं
वाचयेत्सुधीः॥ हस्तसंस्थापनादेवदन्यथाविफलंभवेत्॥ स्व
यंचलिखितंयत्तुकृतिनालिखितंचयत्॥ अब्राह्मणेनलिखि
तंनच्चापिविफलंभवेत्॥ कृतिर्लेखकः॥ अध्यायंप्राप्यविरमे

न्नतमध्येकदाचन॥ कृतेविरामेमध्येचेदध्यायादिपठेत्पुनः
ब्राह्मणंवाचकंविघ्रान्नान्यवर्णजमादरात्॥ श्रुत्वान्यवर्णजा
रा॰नि॰ २५ द्राजन्वाचकान्नरकंव्रजेत्॥ इतिभविष्यपुराणात्॥ कालिका-
पुराणे॥ महापूजांतथाष्टम्यांविशेषेणसमाचरेत्॥ होमंजाग
15 रणंकुर्याद्बलिदानंमहानिशि॥ नवम्यांबलिदानंचकर्त्तव्यं-
वैयथाविधिः॥ जयंहोमंचविधिवत्कुर्यात्तत्रप्रभूतये॥ तत्रहोम २५
मंत्रस्तुजयंत्यादिः॥ समसग्राम्पावा॥ पुष्पान्तांबलिदानंयद्विजया-

र्थंनृपोत्तम॥तत्रपंचाब्दंमहिषंच्यब्दमजं॥ततश्चमाषकल्कंषण्मां
सोघ्रेर्दद्यादित्तुबलिंनिशिकूष्मांड॥मिक्षुदंडश्चमद्यमासवए
वच॥एतेबलिसमाज्ञेयात्दृप्तौछागसमामता॥अथकुमारीपू
जादेवीपुराणे॥ततध्यानुष्यतेशक्रहोमदानजपादिषु॥कुमारी
न पूजयेन्नात्रयथादेवीप्रसीदति॥स्कांदे॥एकैकांपूजयेत्कन्यामे
कवृद्ध्यातथैववच॥द्विगुणांत्रिगुणांवापिप्रत्येकंतथवा॥एकवर्षान्तु
याकन्यापूजार्थंतांविवर्जयेत॥गंधपुष्पफलादीनांप्रीतिस्तस्यान

विद्यते॥ द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात्॥ यथोक्तकाला
मेनुदेवीपुराणे॥ विवाहानंतरं कन्यानामुपजायते॥ तावत्संपू
ज्यते कन्यायावत्पुष्पं न दृश्यते॥ स्कांदे पूजामंत्रः॥ मंत्राक्षरमयीं
लक्ष्मीं मातृणां रूपधारिणीं॥ नवदुर्गात्मिकां साक्षात्कन्यामा
वाहयाम्यहं॥ जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि॥ पूजां गृ
हाण कौमारि जगन्मातर्नमोस्तु ते॥ एवमभ्यर्चनं कुर्यात्कुमारी
णां प्रयत्नतः॥ कंचुकैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः॥ नाना

विधेर्मंत्रहोमैस्मिर्भोजनैर्यमसाद्दिभिः॥नवरात्रेतरेकालेप्येवमेवा
र्चयेत्सदा॥अत्राप्युक्ताः॥हीनाधिकांगीकुष्ठीचविनाशिकुलसं
भवां॥ग्रंथिस्फुटितशीर्णांगीरक्तपूयव्रणांकितां॥जातंधांकेक
रांकाणींकुरूपांतनुरोमशां॥संत्यजेद्रोगिणींकन्यांदासीभर्गस
मुद्भवां॥विश्वरूपनिबंधे॥आश्विनेशुक्लपक्षेतुप्रारब्धेनवरात्र
के॥शावसूतेसमुत्पन्नेक्रियाकार्याकथंबुधैः॥देवीपूजांचक
न्याबलिदानंविधानतः॥सूतकेपूजनंप्रोक्तंदानंचैवविशेष

रा॰नि॰
१
17

तः॥ अथ प्रथमारंभः॥ देवीमुद्दिश्य कर्तव्यं नवदुर्गोत्सवं व्रतं॥ अ
स्तंगते गुरौ शुक्रे सिंहस्थे विबुधाधिपे॥ देवीपूजनमुद्दिश्य स्थाविरे
वालके तथा॥ स्याद्यारंभे विरामः॥ स्याद्वितीपादोन चिंतयेत ततः
स्त्रीणां विशेषो मनुः॥ गंधं चाभरणं पुष्पं तांबूलमनुलेपनं॥ उप
वासेन दुष्यंति दंतधावमंजनं॥ इति नवरात्रकृत्यम कार्तिकशुक्ल
प्रतिपत्पूर्वविद्धा ग्राह्या॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिने
इति ममोक्तेः॥ चंद्रोदयदिने गोक्रीडा निषेधः॥ गवां क्रीडा दिने १

यत्रगात्रोपपश्यतिचंद्रमाः॥सोमोराज्ञापशूनहंतिसुरभीपूजकां॥
स स्तया॥इतिपुराणोंमुच्यतेयत्नइवसिष्टः॥वत्सपादोवसंतादोवलिय
न्येनतथैवच॥तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यते॥स्कांदे॥प्राते
गोवर्द्धनोपूज्योघृतंचापिसमाचरेत्॥पूजनीयास्तदागावस्त्या॥
ज्या॥वाहनदोहने॥पूजामंत्रः॥गोवर्द्धनधराधारगोकुलत्राणका
रक॥हरूसवाऊहतनोछायगवांकोटिप्रदोभव॥गोपूजामंत्रः
यालक्ष्मीर्लोकपालानांधेनुरूपेणसंस्थिता॥घृतंवहतियज्ञा

ग०नि०

१८

18

र्थं मम पापं अपोहतु ह्यग्रतः संतु मे गावो गावो मे संतु पृष्ठतः । गावो

मे संतु हृदये गवां मध्ये वसाम्यहं ॥ ततो बलिं समालिख्य गंधैः पंचव

र्णकैः । गंधपुष्पादिभिर्भक्त्या बलिराजनमर्चयेत ॥ मंत्रः बलिराज

नमस्तुभ्यं देवदानववंदित ॥ इंद्रशत्रो महासत्त्व विष्णुसान्निध्यदो भव

इति ग्राहो ॥ तस्माद्द्यूतं प्रकर्तव्यं निशायां तत्र मानवैः ॥ तस्मिं द्यूते ज

यो यस्य तस्य संवत्सरे जयः ॥ पराजयो विरुद्धश्च लाभनाशकरो भ

वेत ॥ दर्पिनाभिश्च समदीनैर्नैयामा च भवेनिशा ॥ इति प्रतिपन्निर्णय

यः ॥ अथ द्वितीया ॥ सा तु पराग्राह्या युग्माग्नीति वाक्यात् ॥ तथा च वि
ष्णुधर्मोत्तरे ॥ एकादश्यष्टमीषष्ठीद्वितीया तु त्रयोदशी ॥ चतुर्दश्य
प्यमावास्या उपोष्याः स्युः परान्विताः ॥ अत्र विशेषः स्कांदे ॥ आषा
या ढस्य सितेपक्षे द्वितीया पुष्यसंयुता ॥ तस्यां रथसमारोपं रामभद्र
यास्तु ॥ अथ श्रावणद्वितीया हुलपा ॥ सा पूर्वविद्धा ग्राह्या सर्वे
तः ॥ हुलपाष्टमी कृष्णा सावित्रीवटपैतृकी ॥ कामं त्रयोदशीं रं
भा तो पोष्या स्वा परान्विताः ॥ अथ कार्तिकशुक्लद्वितीयायम

या॰नि॰
१९

द्वितीयाप्यते॥सापराह्णव्यापिनीग्राह्यादिनद्वयेचेत्सराकर्मकाल
व्याप्त॥गंगादासः॥तृतीयायांसंमिश्रितानाद्वितीयाकार्यायम
मार्च्यादिविधौतुपूर्वाचंद्रोदयाकालविधौप्रशस्तास्तदेवचंद्रो
दयगामिनीया॥तदुक्तंस्कांदे॥ऊर्जेशुक्लद्वितीयायामपराह्णे
र्चयेद्यमं॥स्नानंविधाययमुनायांयमलोकंनपश्यति॥ऊर्जेशु
क्लद्वितीयायांपूजितस्तर्पितोयमः॥वेष्टितःकिंनरैर्हृष्टैस्तस्मै
यच्छतिवांछितं॥भविष्ये कार्तिकशुक्लपक्षस्यद्वितीयायांयुधि

19

ष्ठिरः॥ यमो यमुनया पूर्वं भोजितः॥ स्वगृहे र्चितः॥ अतो यमद्वि
तीये॥ पंक्तिश्रु[illegible]॥ श्रु[illegible]निगृहे विप्रन भोक्तव्यं
न्नतो नरैः॥ स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं॥ दानानि च
प्रदेयानि भगिनीभ्यो विशेषतः॥ स्वर्णालंकारवस्त्रान्नपूजास
त्कारभोजनैः॥ सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥ भ
तत्स्थानीयाः ब्रह्मांडे॥ यानभोजयते नारी भ्रातरं युग्मके ति
थौ॥ पूजयेद्वापि तांबूलैर्न सा वैधव्यमाप्नुयात्॥ भ्रातुरायुष्यतयो

ग॰नि॰
२०
20

राज्ञनतभवेतत्रकार्द्दिचीत ॥ अथकृत्यंयमपूजायांप्रणाममंत्रः

स्कांदे ॥ धर्मराजनमस्तुभ्यंनमस्तेयमुनाग्रजः ॥ पाहिमांकिंकरैः

सार्द्धंसूर्यपुत्रनमोस्तुते ॥ यमुनांचसंपूज्यप्रार्थयेत ॥ यमस्वसर्न

मस्तेस्तुयमुनेलोकपूजिते ॥ वरदाभवमेनित्यंसूर्यपुत्रिनमोस्तुते

ततोन्नंदत्वाभगिनीपठति ॥ भगिन्यहेतवभ्रातुर्भुंक्ष्वभक्तमिदंप्री

तयेयमराजस्ययमुनायाविशेषतः ॥ इतिद्वितीयानिर्णयः ॥

अथतृतीयासातुपराग्राह्याविष्णुधर्मोत्तरे ॥ एकादश्यष्टमीपा २०

र्णमासीचतुर्दशी॥ अमावास्यातृतीयाचतथाउपोष्याःपरान्विताः॥ रं
भाव्रतेतुपूर्वैवतदुक्तं॥ ब्रह्मवैवर्ते॥ रंभाख्यांवर्जयित्वैकांतृतीयांद्वि
जसत्तमः॥ अन्येषुसर्वकार्येषुगणयुक्ताप्रशस्यते॥ गणश्चतुर्थी
चैत्रशुक्लतृतीयायांदोलोत्सवः॥ गारुडे॥ चैत्रेमासिसितेपक्षे॥ तृ
तीयायांरमापतिं॥ दोलारूढंसमभ्यर्च्यमासमांदोलयेत्कलौ॥ दोला
रूढंसदेवस्ययेग्रेकुर्वंतिजागरं॥ सर्वपुण्यफलावाप्तिर्निमिषेर्भवे निमिषे
त्॥ इयमेवतृतीयागुणगौरीतृतीयोच्यते॥ तत्रमुहूर्तमात्रपरयुता

ग्राह्या ॥ स्कांदे ॥ तृतीयां पूजयेद्देवीं शंकरेण समन्वितां कुंकुमागुरु
रा.नि. कर्पूरमणिवस्त्रैः सुगंधकैः ॥ स्रक्गंधधूपदीपैश्च दमनेन विशे
२१ षतः ॥ आंदोलयेत्ततो वत्स शिवोमातुष्टये तिच ॥ वैशाखशुक्लातृ
21 तीयायां त्रिलोचनयात्रोक्ता काशीखंडे ॥ राधशुक्लतृतीयायां स्नात्वा
पैप्पिले ह्रदे ॥ संतर्प्य पितृन्देवान् त्रिलोचनमथार्चयेत् ॥ इयमेवा
क्षयतृतीयोच्यते ॥ तदुक्तं भविष्ये पात्वपाकुरुशार्दूल वैशाखे तु
महातिथिः ॥ तृतीयामात्तयालोके गीर्वाणैरभिवंदिता ॥ सा पूर्वा २१

ह्णव्यापिनी ग्राह्या ॥ तदुक्तं नारदीये ॥ द्वे शुक्ले द्वे तथा कृष्णे युगादी मु
नयो विदुः ॥ शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥ अथ वि
शेषो देवीपुराणे ॥ तृतीयायां तु वैशाखे रोहिण्यर्क्षे तु पूजयेत ॥ उदकुं
भप्रदानेन शिवलोके महीयते ॥ कुंभदानमंत्रः ॥ एष धर्मघटो दत्तो
ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्तृप्यंतु पितरश्च पितामहाः
गंधोदकतिलैर्मिश्रं सान्नं कुंभं सदक्षिणं ॥ पितृभ्यः संप्रदास्यामि
अक्षय्यमुपतिष्ठतु ॥ एतदसंभवे तिलतर्पणं कार्य्यं ॥ उक्तं च विष्णु

धर्मांतरे ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतन्मुनयो वदंति ॥ तथाचात्रम
लमासे सक्तिविशेषश्चंद्रिकायां ॥ योगादिकं मासिकं च दर्शश्राद्धं ।
तथैव च ॥ मन्वादिकं तैथिकं च कुर्यान्मासद्वयेपि च ॥ ज्येष्ठशुक्लतृ
तीयारंभातृतीयोच्यते ॥ सा पूर्वा ग्राह्या ॥ तदुक्तं स्कांदे ॥ बृहत्तपा च रंभा
च सावित्री वटपैतृकी ॥ कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिः
संमुखी सायह्नव्यापिनी ॥ भाद्रकृष्णतृतीयायां विशालाक्षीपात्रो ।

न्काकाशीखंडे ॥ भाद्रकृष्णतृतीयायामुपवासपरैर्नृभिः ॥ कृत्वाजा
गरणंरात्रौविशालाक्षीसमीपतः ॥ अत्ररात्रिव्यापिनीग्राह्या ॥ अ
थभाद्रपदशुक्लतृतीयाहरितालकोच्यते ॥ सामुहूर्तमात्रापिपर
युताग्राह्या ॥ तदाहमाधवीये ॥ मुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरे र
शुद्धाधिकायामप्येवंगणयोगप्रशंसनात् ॥ गणश्चतुर्थीतद्युतायांफ धु
लाधिक्यमाह ॥ आपस्तंबः ॥ चतुर्थीसहितायातुसातृतीयाफल
प्रदा ॥ अवैधव्यकरीस्त्रीणांपुत्रपौत्रविवर्द्धनी ॥ तृतीयायोगप्रसवा

यमप्याहुः॥ द्वितीयाशेषसंयुक्तां तृतीयां प्रकरोति या॥ सौवैधव्यम्
वाप्नोति प्रवदंति मनीषिणः॥ अत्रोक्तं स्कांदे॥ कलाकाष्ठापि वा यत्र
द्वितीया संप्रदृश्यते॥ सा तृतीया न कर्त्तव्या॥ कर्त्तव्या गणसंयुता॥ इति
हरितालिकातृतीया॥ अथाश्विनकृष्णतृतीयायां ललितामात्रो
क्ता। काशीखंडे॥ ईषकृष्णतृतीयायां ललितां प्रतिपूज्य वै॥ नारी वा
पुरुषो वापि लभते वांछितं फलं॥ अत्र कर्मकालव्यापिनी ग्राह्या॥
इति तृतीयानिर्णयः॥ अथ चतुर्थी सा परविद्धा ग्राह्या युग्मवाक्या।

त ॥ बृहद्वसिष्ठः ॥ एकादशी तथा षष्ठी अमावास्या चतुर्थिका ॥ उपो
ष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥ सर्वास्वचतुर्थीढुंढिराजया
त्राकाकाशीखंडे कुर्यात् प्रतिचतुर्थीषु यात्रां विघ्नेश्वरस्यैव ॥ बाल
ऐभ्यस्तद्गुडैश्चाद्यैर्याद्यैर्मोदकान्मुदेतिलैंगे ॥ अंगारकचतुर्थ्यां ये
स्नानेनात्र वहांभसि ॥ संपूज्यांगारकेशानं नमस्यंति नरोत्तमाः ।
न तेषां ग्रहपीडा च कदाचित्क्वापि जायते ॥ श्रावणे कृष्णचतुर्थी
संकष्टचतुर्थी समुच्यते । सा चंद्रोदयव्यापिनी ग्राह्या ॥ तदुक्तं स्कांदे

ग.नि.
२४

श्रावणकृष्णचतुर्थीसंकष्टचतुर्थीत्युच्यते॥ साचंद्रोदयव्यापिनी
ग्राह्या॥ तदुक्तंस्कांदे॥ श्रावणेबहुलेपक्षेचतुर्थ्यांचविधूदये॥ त
स्मिन्दिनेव्रतंकार्यंसंकष्टाख्यंसुरेश्वरि॥ इयंदिनद्वयेसाम्येपूर्वै
वमातृविद्धागणेश्वरवचनात्॥ भाद्रकृष्णचतुर्थीबहुलाचतु
र्थीत्युच्यते॥ सापूर्वैवतदुक्तंपुराणसमुच्चये॥ गौर्याचतुर्थीवट
धेनुपूजादुर्गार्चनंतुभैरहोलिकेच॥ वत्सस्यपूजाशिवरात्रिरेता २४
परान्विताग्राह्यानिरूपसराजमिति॥ भाद्रशुक्लचतुर्थीवरदचतुर्थी

24

त्युच्यते॥सामध्याह्नव्यापिनीपूर्वविद्धाग्राह्यापूर्वेद्युर्मध्याह्नव्याप्त्य
भावेपरैवतदुक्तंगुरुः॥चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते॥म
ध्याह्नव्यापिनीचेत्स्यात्परतश्चेत्परेहनि॥प्रातःशुक्लतिलैःस्नात्वाम
ध्याह्नेपूजयेन्नृपेति॥पूजायास्तत्कालत्वात्॥दिनद्वयेमध्याह्नव्या
प्त्यभावेव्याप्तित्वेवापूर्वैव॥इयंचरविभौमाभ्यांयुतामहतीप्रोक्ता॥
तदुक्तंवाराहपुराणे॥भाद्रशुक्लाचतुर्थीयाभौमेनार्केणवायुता
महतीसात्रविघ्नेशंसंपूज्येष्टंलभेन्नरः॥अस्यांचंद्रंनपश्येत्॥तदा

हमार्कंडेयःभाद्रमासिसितेपक्षेचतुर्थीस्वातियोगिनी॥मिथ्याभि
रा॰सि॰ शापंकुरुतेदृष्टचंद्रेणसंशयः॥तद्दोषनिर्हृतयेपुराणसमुच्चये।ततः
२५ श्चतुर्थ्यांरात्र्यांयोप्रमदांद्वीक्षमानवः॥पठेत्पौराणिकंमंत्रंप्राङ्मु
25 ८ खोवाउदङ्मुखः।सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः।सुकुमार
कुमारोदीस्तवह्येषस्यमंतकः।कार्तिकस्यचतुर्थीकरकचतुर्थी
त्युच्यते॥तदुक्तंभविष्येकार्तिकस्यासितेपक्षेचतुर्थ्यांचविधूदये।
गौरीशंकरयोः॥पूजास्त्रीभिःकार्याचतद्व्रतमिति॥दिनद्वयेचेत्पूर्व २५

विद्धा ग्राह्येति ॥ माघशुक्लचतुर्थी तिलचतुर्थीत्युच्यते ॥ तदुक्तं काशी
खंडे ॥ माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः ॥ ये त्वां ढुंढेर्चयिष्यंति
तेर्च्याः सुरासुरैर्ढुंढे ॥ विधाय वार्षिकीं यात्रां माघे प्राप्य चतुर्थिकां
शुक्लांस्तिलैर्गुडैर्वेद्धाप्रामालीपाल्लडुकान्व्रती ॥ अत्र नक्तग्रहणात्प्र
दोषव्यापिनी ग्राह्या ॥ इयमेव कुंदचतुर्थीत्युच्यते ॥ सा मध्याह्नव्या
पिनी ग्राह्या ॥ पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति नियमा
त् ॥ तदुक्तं कौर्मे ॥ माघशुक्लचतुर्थ्यां तु कुंदपुष्पैर्विशेषतः ॥ कुंकुमे

ग.नि.

२६

26

रक्तपुष्पैश्चसिंदूरेणान्नमोदकैः। आलक्तकैरक्तवस्त्रैर्गौरीस्त्रीभिःप्र
पूजिता॥ सौभाग्यमतुलंदद्यातंचमांश्रीरपिश्रियं॥ इतिचतुर्थी
निर्णयः॥ अथपंचमी। साचतुर्थीयुतैवग्राह्या॥ युगभूतानामिति
युग्मवाक्यात॥ पंचमीसप्तमीचैवदशमीचत्रयोदशी॥ प्रतिपन्नव
मीचैवकर्तव्यासंमुखीतिथिरितिपैठीनसीतिवचनात॥ संमुखीसा
याह्नव्यापिनी॥ ब्रह्मवैवर्तेपि॥ पंचमीप्रतिपद्भूतासावित्रीवटपू
र्णिमानवमीदशमीचैव॥ नोपोष्याःपरसंयुताः॥ मात्स्ये॥ ब्रह्मणे

स्यच पंचमी चैत्रमासस्य तथैवांत्यात थापरा शुक्लात्र दशी माघे कार्त्तिकस्य तु २

योदिनस्यादिः कल्पादिः संप्रकीर्तितः॥ वैशाखस्य तृतीया या या पाक्ष

स्याफाल्गुणे सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहं। क

ल्पानामादयो ह्येतादत्तस्याक्षयकारकाः॥ एताः शुक्लाः पौर्वाह्णिकाः

कृष्णाश्चापराह्णिका॥ इति युगादि वचनं॥ शुक्लपक्षे तिथिर्ग्राह्या यस्याम

भ्युदितो रवौ॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तंगतो रविरिति वाक्या

त्॥ अत्र पक्षविशेषानुपादाने शुक्लो ज्ञेयः॥ श्रावणशुक्लपंचमी ना

गपंचमीत्युच्यते॥ सा परविद्धा पा ग्राह्या॥ तदुक्तं चमत्कारचिंतामणौ

पंचमीनागपूजायांकार्याषष्टीसमन्विता॥ तस्यांतुतुषितानागा॥ इ
तरासचतुर्थिका॥ स्मृत्यंतरेपि॥ श्रावणेपंचमीशुक्लासंप्रोक्ताना
गपंचमी॥ तांपरित्यज्यपंचम्यंचतुर्थीसहिताहिता॥ तत्रोक्तंका
शीखंडे॥ यःस्नात्वानागपंचम्यांकुंडेवासुकिसंज्ञके॥ नतस्यवि
षसंसर्गोभवेत्सर्पसमुद्भवः॥ भविष्ये॥ श्रावणेमासिपंचम्यांशु
क्लपक्षेनराधिपः॥ द्वारस्योभयतोलेख्यागोमयेनविषोल्बणाः॥ पू
जयेद्विधिवद्वीरदधिदूर्वांकुरैःकुशैः॥ गंधपुष्पोपहारैश्चब्राह्मणा

नांतर्प्पणो ॥ नसांयेपूजयंतीहनागान्भक्तिपुरःसराः नतेषांसर्प
तोवीरभयंभवतिकुत्रचित ॥ तथाचप्रभासखंडे ॥ नागवल्कुरुकुल्लां
चमंत्रेणानेनपूजयेत ॥ ॐकुरुकुल्लेहुंफट्स्वाहा ॥ यत्रायमर्च्यतेमंत्रः
सर्वसर्पनिषेधकः ॥ नतत्रसर्पोदृश्यतेनविषंक्रमतेसदेति ॥ भाद्र
पदशुक्लपंचमीऋषिपंचमीत्युच्यते ॥ तदुक्तंब्राह्मे ॥ भाद्रस्यशुक्ल
पक्षेतुयदाभवतिपंचमी ॥ नद्यादिकेनदास्नात्वाचाकृत्वानियममेव
च ॥ ब्राह्मणाक्षत्रियावैश्याःशूद्राश्चापिवरानने ॥ कृत्वानैमित्तकंकर्म

गत्वानिजगृहंपुनः॥वेदींसम्यक्प्रकुर्वीतगोमयेनप्रलिप्यतां॥रंग
वलिसमायुक्तांनानापुष्पोपशोभितां॥तत्रसप्तऋषीन्दिव्यान्भ
क्तिपूर्वकःप्रपूजयेत्॥तत्रपंचमीपूर्वयुताग्राह्येति॥मदनरत्नेयुग्म
वाक्यान्माधवीयेप्येवं॥आश्विनशुक्लपंचमीउपांगललितापंचमी
मुच्यते॥सामध्याह्नव्यापिनीग्राह्यापूजाविधानात्॥माघशुक्लापंच
मीउपांगललितापंचमीमुच्यते॥सामध्याह्नव्यापिनीग्राह्यापूजा
विधानात्॥माघशुक्लपंचमीश्रीपंचमीमुच्यते॥सापूर्विकोक्तो॥स्म

त्रश्रीशाह्येनानार्थेतथासारस्वत्यामपिसमुक्तः॥ यथालक्ष्मीसर

स्वतीधात्रीवर्गसंपद्विभूतिशोभासु॥ उपकरणवेशारचनाविद्या

सु च श्रीरितिपठ्यते॥ अथसारस्वतोत्सवः॥ संवत्सरप्रदीपे॥ पंच

म्यांपूजयेद्वाणींगंधपुष्पान्नवारिभिः॥ मस्याधारंलेखनींचपूज

येन्नलिखेन्नतः॥ माघेमासिसितेपक्षेपंचमीयाश्रियःप्रिया॥ त

स्यांपूर्वाह्णएवहिकार्यः। सारस्वतोत्सवः॥ तत्रध्यानंशारदातिलके

यथा॥ तरुणसकलमिंदोर्बिभ्रतीशुभ्रकांतिः॥ कुचभरनमितां

गीमन्निषण्णामिताङ्गे ॥ निजकरकमलोद्यल्लेखनीपुस्तकश्रीः। स
शा॰नि॰ कलविभवसिद्धिपातुवाग्देवतानः ॥ ततोब्रह्मपुराणीयमंत्रेण
२९ त्रिःपूजयेत ॥ ॐभद्रकाल्यैनमोनित्यंसरस्वत्यैनमोनमः ॥ वेदवेदां
29 गवेदांतविद्यास्थानेभ्यएवचस्वाहेतिततोमसीधारांलेखन्या
दिकंचपूजयेत ॥ अत्रमत्स्यसूक्ते ॥ द्रोणपुष्पचवाधूकंसरस्वत्यैन
चार्चयेत ॥ इति ॥ ततोमात्स्येप्रार्थनं ॥ यथानदेवीभगवान ॥ ब्रह्मा २९
लोकपितामहः ॥ त्वांपरित्यज्यसंतिष्ठेतथाभववरप्रदा ॥ वेदाःशा

स्त्राणिसर्वाणिनृत्यगीतादिकंचयत्॥नविहीनंत्वयादेवितथा
मेसंतुसिद्धयः॥लक्ष्मीर्मेधाधरापुष्टिर्गौरीतुष्टिःप्रभाधृतिः॥ए
ताभिःपाहितनुभिरष्टाभिर्मांसरस्वती॥इयंपंचमीपूर्वाह्णव्यापि
नीग्राह्यादिनद्वयेचेत्पूर्वैव॥इतिश्रीपंचमी॥इयमेववसंतपंचमी
च्यते चोँ॥मासःपूर्वैव॥तदुक्तंपुराणसमुच्चये॥माघमासेनृपश्रेष्ठशुक्ला
यांपंचमीतिथौ॥रतिकामंचसंपूज्यकर्तव्योयंमहोत्सवः॥दाना
निचप्रदेयानितेनतुष्यतिमाधवः॥माधवोवसंतः॥इतिपंचमी

शा·नि·
३०
वा
30

निर्णयः ॥ अथ षष्ठी ॥ सा स्कंदव्रतातिरिक्ता सप्तमीयुता ग्राह्या युग्म
वाक्यात् ॥ अत्र पंचमीवेधः ॥ षण्मुहूर्तात्मको ज्ञेयः ॥ नागो द्वादश
नाडीभिरिति वचनात् ॥ तेन षण्मुहूर्तन्यूनपंचमीयोगे पूर्वैव । अस्या
मेव रवियोगे लोलार्के । यात्रोक्ता काशीखंडे ॥ कृतानि यानि
पापानि नरैः । संवत्सरादपि ॥ नश्यंति तत्क्षणात्तानि षष्ठ्यर्के लोला
र्कदर्शनात् । लोलोलोलार्कः ॥ आषाढशुक्लषष्ठी स्कंदष
ष्ठीमुच्यते ॥ स्कांदे । कृत्वाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी ॥ एताश्च ३०

र्वेयुताकार्यातिथ्यंतेपारणंभवेदिति ॥ भाद्रकृष्णपक्षीयहरषष्ठी
मुच्यते ॥ तदुक्तंभविष्यपुराणे ॥ अथभाद्रस्यमासस्यकृष्णपष्ठ्यां
वनांतरे ॥ पलाशकुशयोर्मूलेस्वपुत्रार्थंसुपर्णया ॥ व्रतंधृत्वार्चि
तोभक्त्याकुटुंबसहितोनृपः ॥ तस्माद्धेहरषष्ठीतिख्याता ॥ दुर्वास
सापुरा ॥ साषष्ठीसप्तमीयुताग्राह्या ॥ नागयुतांत्यजेदिति ॥ स्कंदपु
राणे ॥ षष्ठ्येकादशामावस्यापूर्वविद्धातथाष्टमी ॥ सप्तमीवारवि
द्धाचनोपोष्यातिथिपंचकमिति ॥ भारते ॥ सगरेणकृताषष्ठीपंचम्या

सहभारते॥ दत्ताः पुत्राः सहस्राणितस्मान्नागपुत्तांस्त्यजेदिति॥ आ
दिसपुराणे॥ कलाकाष्टानिमेषोपि॥ यदिस्यादपरेह्नि॥ हरषष्ठ्या
श्चविप्रेंद्रसेवोपोष्याप्रयत्नतः॥ दिनद्वयेचेउदयव्यापित्वेसंपूर्ण
त्वात्पूर्वैव॥ इतिहरषष्ठी॥ इयमेवयोगविशेषेणकपिलाषष्ठीचो
च्यते॥ पुराणसमुच्चये॥ भाद्रेमासिसितेपक्षेभानुश्चैवकरेस्थिते॥
पातेकुजेचरोहिण्यांसाषष्ठीकपिलाभवेत्॥ संयोगेतुचतुर्णांतुनि
र्दिष्टापरमेष्टिना॥ अत्रचतुर्णांयोगेनप्राशस्त्यंनतुकेवलषष्ठ्यादीनां ३१

णायत्रयाणां ॥ अत्रषष्ठीहस्तस्थितस्यभानोरभावान्महालयस्त्रप
क्षएवभवतिसाचयोगवलात्सूर्वदिनेपरदिनेवाग्राह्या: ॥ अत्रव्रत
विधानमुक्तं ॥ हेमाद्रौ ॥ स्थापयेद्व्रणंकुंभं चंदनोदकपूरितं ॥ रक्तव
स्त्रयुगाछन्नंताम्रपात्रेणसंयुतं ॥ रथोत्कमपलस्यैवएकचक्रोऽश्व
सप्तक: ॥ सौवर्णपलसंयुक्तांमूर्तिंसूर्यस्यसंन्यसेत ॥ सौवर्णमरु
णंकुर्यात्त्रीकांचैवरथेस्थितां ॥ तत्रसूर्यंचसंपूज्यपूजयेदरुणंतथा
स्नापयित्वासतांरात्रिंगीतवादित्रनि:स्वनै: ॥ ततस्त्वष्टदिनेसूर्यं

रा॰नि॰
३२
32

होमंकुर्यात्स्वशक्तितः॥ततश्चकपिलांदद्यात्सूर्यंमूर्तियुतामिति। ततः
प्रार्थयेत॥दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मादिवाकरः॥कपिलासहितोदे
वोममभुक्तिंप्रयच्छतु॥यस्मात्वंकपिलेपुण्यासर्वलोकस्यपाविनी
प्रदत्तासहसूर्येणममभुक्तिप्रदाभव॥एतद्व्रतस्यमुक्तिफलमुक्तं॥
इतिकपिलाषष्ठी॥इयमेवषष्ठीचंद्रषष्ठीत्युच्यते॥तदुक्तंभविष्ये॥नभ
स्यस्यपदेमासिषष्ठ्यांपक्षेसितेतरे॥चंद्रषष्ठीव्रतंकुर्यात्पूर्वविद्धैवसा ३२
स्मृते॥इयंतुचंद्रोदयव्यापिनीग्राह्यादिनद्वयेचेत्पूर्वैव॥दिनद्वयेचेद्व

द्रोदये ष[ष्ठ]ी न स्यात्तदैवं ।। व्रतमपि न स्यात् ।। एतद्व्रतस्य फलं चंद्रलो
कावाप्तिकमुक्तं ।। भाद्रशुक्लषष्ठी योगविशेषेण ।। चंपाषष्ठी चोच्यते
तदुक्तं स्कांदे ।। मासि भाद्रपदे शुक्ला षष्ठी वै यदि संयुता । सा चंपेतीह रविवारेण संयुक्ता
कीर्तिता ।। मार्गमासीयशुक्लषष्ठी चोच्यते ।। तदुक्तं पुराणसमुच्चये ।।
मार्गशीर्षे मले पक्षे षष्ठ्यां वारेंऽशुमालिनः ।। शततारागते चंद्रे लिं
गं स्याद्दृष्टिगोचरं ।। इयं च चंपाषष्ठी योगविशेषेण पूर्वा परा वा ग्रा
ह्या ।। इति षष्ठीनिर्णयः ।। अथ सप्तमी सा पूर्वाह्णव्यापिनी ग्राह्या ।। तदु

कंस्कांदे॥ षष्ठ्यायुतासप्तमीचकर्तव्यातानसर्वदा॥ वैशाखस्यशुक्लस
रा॰नि॰ प्तम्यांगंगापूजोक्ता॥ ब्राह्मे॥ वैशाखस्यशुक्लसप्तम्यांजह्नुनाजाह्नवी।
३३ स्वयं॥ क्रोधात्पीत्वापुनस्त्यक्ताकर्णरं॥ ध्रात्तुदक्षिणात्॥ तांतत्रपूज
येद्देवींगंगांगगनमेखलां॥ भाद्रशुक्लसप्तमीस्यमुक्ताभरणसप्त।
मीसुच्यते॥ तद्व्रतंभविष्ये॥ भाद्रेमासिसितेपक्षेसप्तम्यांनियमेन
या॥ स्नात्वाशिवंलेखयित्वामंडलेचमहांबिकां॥ पूजयेच्चनतदान ३३
स्यांदुःखापंनैवविद्यते॥ एवंशिवांबिकयोःपूजांमेवर्णाद्विजार।

रकधारणंकथाश्रवणंचकर्त्तव्यं॥ तत्रवेणुपदादिदानमपिक्रि
यते॥ अत्रफलंसंततिवृद्धिर्मृतवत्साया जीववत्सात्वंशिवलोक
प्राप्तिश्च॥ सप्तमीयंमध्याह्नव्यापिनीग्राह्या॥ पूजाव्रतेषुसर्वेषु
मध्याह्नव्यापिनीतिथिरितिपूर्वोक्तवचनात्॥ दिनद्वयेचेत्पूर्वै
व युग्मवाक्यानुरोधात्॥ अतिसंतानसप्तमी॥ आश्विनशुक्ला
सप्तमीदेवीपूजायांनवपत्रिकाप्रवेशेचसूर्योदयव्यापिनीग्राह्या
लिंगपुराणे॥ मूलाभावेतुसप्तम्यांकेवलायांप्रवेशयेत॥ युग्म

भिन्नांचबिल्वसफलाभ्यांशाखिकांतथा॥ ततकालमुक्तंभविष्ये
गा॰नि॰ युगधावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया॥ रवेरुदयमीक्षंतेननता
३५ सतिथियुग्मता: वर्षवृद्धिर्जन्मतिथि:। ततोलिंगा॥ ब्रह्मविष्णु
शिवादीनांश्रोणपुष्पंसदाप्रिया॥ ततेदुर्गेप्रयच्छापिसर्वकामा
र्थसिद्धये॥ इतिमंत्रेणसँमम्यादिदिनत्रये॥ श्रोणपुष्पैरपिदुर्गा स
पूजनीँयासरस्वती॥ पूजयेत्मनपहं देविश्रवणांयावहत्तकं। ना
श्वापयेत्रचलिखेन्नाधीयीतकदाचन॥ पुस्तकंस्थापयेद्देविवि ३५
मेति अत्रेवमूलनक्षत्रेपुस्तकस्थापनमुक्तं॥ रुद्रयामले मूल ऋक्षेस्तु
राधीश्च पूजनी

34

ष्ठा कामो द्विजोत्तमः । संग्रहेपि । आश्विनस्य सिते पक्षे ॥ विद्या-

कामः सरस्वतीं ॥ मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥ मा

घशुक्लसप्तमी । अचलाख्यसप्तमी अचलासप्तमीत्युच्यते ॥ साः रुणो

दयव्यापिनी स्नानादौ ग्राह्या ॥ दिनद्वये चेत्सैव तत्रारुणोदयो

मुख्यः कालः सूर्योदयः कालो गौणः । त्रिकंडमंडनं स्वकाला

द्भुतरो गौणः कालः सर्वस्य कर्मणः ॥ इति ॥ हेमाद्रौ सामान्यज

लस्नानमुक्तं ॥ सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी । अ

मा॰नि॰
३५

रुणोदयवेलायांतस्यांस्नानंमहाफलं॥ गंगायांकल्पवल्यां। अरुणो
दयवेलायां॥ शुक्लामाघसप्तमी। गंगायांयदिलभ्येतशतसूर्यग्र
हैः समा॥ भविष्ये॥ अरुणोदयवेलायांशुक्लामाघस्यसप्तमी।
प्रयागेयदिलभ्येतकोटिसूर्यग्रहैः समा॥ हेमाद्रौ॥ माघेमासिसि
तेपक्षेसप्तमीकोटिभास्करा॥ दद्यात्स्नानार्घदानाभ्यामायुरारो
ग्यसंपदः। कोटिभास्करापि॥ सप्तम्यांभास्करदेवताकत्वेनभास्क
रसप्तमीतथाचकोटिसप्तमीतुल्येत्यर्थः। भविष्येमाघस्यसितस

35

मर्य्यमचलं चालितं च यत ॥ जलं मलानां सर्वेषां स्मृतं प्रक्षालनं ततः
प्रबला सप्तमी स्नानं कथितं ते विशांपते ॥ सर्वपापप्रशमनं सु
खसौभाग्यवर्द्धनं ॥ तत्र स्नानमुक्तं ॥ भविष्ये ॥ कृत्वा षष्ठ्यामेकभ
क्तं सप्तम्यां निश्चलं जलं ॥ आलाबुपत्रिभिश्चैव जलेगोर्म्मत्स्यक
च्छपैः ॥ नक्रैर्न चाल्यते यावत्तावत्स्नानं समाचरेत ॥ स्नानकालेल
तायां ॥ सप्तबदरपत्राणि सप्तार्कपत्राणि शिरसि निधाय ॥ ॐ य
द्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ॥ तन्मे रोगं च शोकं च माक

सप्तमे

रीहंतुसप्तमी॥ अनुच्चार्यस्नायात॥ तत्रार्घमंत्रस्तुगोड ग्रंथेजननी
रा.नि. सर्वभूतानांसप्तमसप्तिके॥ सप्तम्यांसहितोदेवोगृहाणार्घंदिवाक
३६ र:॥ सप्तसप्तिकेइतिहार्यस्यांस्यांसप्तिसप्तिसमियुक्तारथ्यावामे:॥
स सप्तमीसप्तसप्तिकेतुते॥ ततःप्रणाममंत्रः सप्तसप्तिवहप्रीत
36 सप्तलोकप्रदीपन:। सप्तम्यांहिनमस्तुभ्यंनमोनंतायवेधसे॥ इ
मबलासप्तमी॥ इयमेवरथसप्तमीत्युच्यते॥ माघषष्टीरविवार
योगेनवतिप्रख्याता॥ गर्ग:॥ षष्ठीचसप्तमीयोगेवारश्चेदंशुमालि

नः॥ योगोयंपद्मकोनामसहस्रार्कग्रहैःसमाः। काशीखंडे लो

लार्केरथसप्तम्यांस्नात्वागंगासिसंगमे॥ सप्तजन्मकृतैःपापैः मु

क्तोभवतितत्क्षणात॥ अस्यांकामवतारंभोदपर्यंतं॥ भविष्ये अर्का

ग्रंथ्युचिगोमयंचमरिचंतोयंफलंचाप्युतैकंदंमूलमुपोषणंचवि

धिवत्कृत्वैकभक्तंपुनः। क्षीरंवाप्यशनंघृताशनमितिप्राक्रुः॥ कृ

मान्माघतः॥ कृत्वावत्सरसप्तमीरविदिनंप्राप्नोत्यभीष्टंफलं॥ इ

तिसप्तमीनिर्णयः॥ अथाष्टमी॥ शुक्लपक्षेष्टमीचैव॥ शुक्लपक्षे

चतुर्दशी ॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥ कृष्णपक्षेऽष्टमी
रा०नि० चैव कृष्णपक्षे चतुर्दशी ॥ पूर्वविद्धैव कर्तव्या परविद्धा न कुत्र चित्
३२ उपवासेषु राजेंद्र एष धर्मः सनातनः ॥ इति निगमात् ॥ चैत्रकृष्णा
ष्टमी शीतलाष्टमीत्युच्यते । सा सप्तमीयुता ग्राह्या ॥ स्कांदे ॥ हृदन
37 पाचरं भाचसा वित्रीव दैपैत्रिकी । अष्टमी शीतलायाश्च कर्तव्या
संमुखी तिथिः ॥ संमुखी सा या कृत्स्नव्यापिनी तिथि ॥ दिनद्वये चेत्सैवैव
तत्कृत्स्नं तत्रैव ॥ चैत्रमासस्य सितपक्षे याष्टमी शीतला कृत्या । तामारं

म्यप्रकर्तव्यंयावन्मासचतुष्टयं॥तावत्शीतलादेवीपूजनीयातिभ
क्तितः॥तत्रध्यानंमंत्रशास्त्रे॥दिगंबरामर्जनिकांचशूर्पंकरद्वयंसं
दधतींघनाभां॥श्रीशीतलांसर्वरुजामिहंत्रीरक्तांगरागाभरणां।
नमामि॥इतिध्यात्वा॥ऐंह्रींश्रींशीतलायैनमः॥इतिमंत्रेणपाद्या
दिभीः संपूजयेदिति॥ततःसर्वाष्टमीषुभैरवीयात्राकाशीखंडे
अष्टम्यांचचतुर्दश्यांरविभू[illegible]मि[illegible]वासरे।॥यात्राचभैरवीकृत्वान
रःपापैःप्रमुच्यते॥तत्रैव॥अष्टम्यांचचतुर्दश्यांभौमवारेविशेष

नः। संपूज्य सततं कश्यपां दुर्गां दुर्गार्तिनाशिनीमिति ।। चैत्रशुक्ला
ष्टम्यां विशेषस्तु चैव ।। चैत्राष्टम्यां महापापात्संभवान्मा कारयेत्सुधीः
अष्टाधिकाः प्रकर्तव्याः शतकृत्वः प्रदक्षिणाः ।। इत्थं परयुता ग्रा
ह्या पुण्यवाक्यादिति ।। अथ भाद्रकृष्णपक्षियाष्टमी श्रीजन्माष्टमी
मुच्यते ।। ब्राह्मे ।। अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।। अष्टा विं
शतिमे जातः कृष्णोसौ देवकीसुतः । अत्र भाद्रे श्रावणोप्यस्तिवां
द्रमासत्वात् ।। स्कांदे ।। अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत्

कृष्णजन्माष्टमीज्ञेयामहापातकनाशिनी॥ पुराणांतरे॥ श्रावणे
बहुलेपक्षेकृष्णजन्माष्टमीव्रतं॥ रात्रियुक्तंप्रकुर्वीतविशेषेणेंदुसं
युतं॥ तमिंदुमाहुर्मुनयःशास्त्रे॥ तिथिगुणितंरजनीपरिमाणंयम
रहितंसितपक्षविमिश्रं॥ बाणशशांकविभाजितमंकंलब्धंपरिचंद्रो
दयमस्तं॥ अत्रकेवलाष्टमीचतुर्दशीपूर्वेद्युरेवार्द्धरात्रिव्यापिनी॥ प
रेद्युरेवनाष्टमी॥ उभयेद्युरेवनोभयेद्युरिति॥ तत्राद्ययोःपक्षयोः
कर्मकालव्यापित्वेनासंदिग्धैवा॥ अंत्ययोःपक्षयोःप्रातःसंकल्प

कालेसत्वादाधिकामौरैव॥ व्रतफलंस्कांदे॥ जन्माष्टमीव्रतंयेवैप्रकु
र्वंतिनरोत्तमाः। कारयंत्यथवालोकांलक्ष्मीस्तेषांसदास्थिरां॥ ति
ष्ठितत्वे॥ संपर्केणापिवाकुर्यात्कश्चिज्जन्माष्टमीव्रतं॥ विष्णुलोक
मवाप्नोतिसोपिनास्त्यत्रसंशयः॥ संपर्केणेतिकार्यांतरव्यासंगे
नेत्यर्थः॥ व्रतमिदंनित्यंस्कांदेयेनकुर्वंतिजानंतः॥ कृष्णजन्माष्ट॰
मीव्रतं॥ तेभवंतिनराःप्राज्ञः। व्यालाव्याघ्राश्चकानने॥ जन्माष्ट॰
मीदिनेप्राप्तेयेनभुक्तंद्विजोत्तमः॥ त्रैलोक्यसंभवंपापंतेनभुक्तं॰

नसंज्ञयः। इत्थंकरणसमवायश्रवणेन। इतिकेवलाजन्माष्टमी
अथजयंतीचोक्तास्कांदे॥ प्राजापत्यर्क्षसंयुक्तायाष्टमीनृपयदाभवे
त्॥ श्रावणेबहुलेपक्षेसानुसर्वाघनाशिनी॥ जयंपुण्यंचकुरुते
जयंतीतांविदुर्बुधाः॥ जयंत्याख्यंव्रतंभिन्नंकृष्णजन्माष्टमीव्रतात्
अथमहाजयंती। तत्रैव॥ उदयेचाष्टमीकिंचिन्नवमीसकलाभवे
त्॥ प्राजापत्यर्क्षसंयुक्ताबुधवारेणसंयुता॥ यावद्वर्षशतेनापिल
भ्यतेयदिवानवा॥ उपोष्यासाप्रयत्नेनकुलकोट्यास्तुमुक्तिदा॥

उदये चंद्रोदये ॥ इति परविद्धापि चाग्निपुराणे ॥ कार्या विद्धापि सप्तम्यां
निशीथे रोहिणी यदि ॥ भविता साष्टमी पुण्या यावच्चंद्रदिवाकरौ ॥
निशीथे ऽर्द्धरात्रे ॥ जयंत्याः परविद्धाया ॥ अभावात्तत्र गारुडे ॥ जयं
त्यां पूर्वविद्धायामुपवासं समाचरेदिति ॥ स्कांदे च ॥ जन्माष्टमी जयंती च
शिवरात्रिस्तथैव च । पूर्वविद्धैव कर्तव्या तिथिभांते च पारणं ॥ इति ॥
तत्रैव ॥ न करोति यदा विष्णोर्जयंतीसंभवं व्रतं ॥ यमस्य वशमापन्नः
सहते नारकीं व्यथां ॥ इत्थं करणप्रत्यवायश्रवणाज्जयंती नित्या चा

पिकाम्या॥महाजयार्थंकुरुतांजयंतीभूतयेथवा।धनमर्थंचका
मंचमोक्षंचमुनिपुंगवः॥ददातिवांछितान्कामान्येचान्येप्य
तिदुर्लभान्॥इतिफलश्रवणात्॥अथार्चनंप्रधानंतत्कालमु
क्तं॥विष्णुधर्मोत्तरे॥रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी
सप्तम्यामर्द्धरात्राधः॥कलयायदाभवेत्॥तत्रजातोजगन्नाथः
कौस्तुभीहरिरीश्वरः॥तमेवोपवसेत्कालंतत्रकुर्याच्चजागरं।
२१ अर्द्धरात्रेतुयोगोयंतारापत्युदयेसति॥नियतात्माशुचिःस्नातः।

पूजां तत्र प्रवर्त्तते ॥ इति भविष्ये पि ॥ मासि भाद्रपदे ष्टम्यां ॥ कृष्णप
क्षे ज्ञवासरे ॥ रोहिण्यामर्द्धरात्रे च वृषराशिविधूदये ॥ योगे स्मि
न्वसुदेवाद्धि देवकी मामजीजनत ॥ तस्मान्मां पूजयेत्तत्र शुचिः
सम्यगुपोषितः ॥ अत्र जागरणं फलं ॥ नारदपुराणे ॥ उपोष्य ज
८ न्मचिह्नानि कुर्याज्जागरणं तु यः ॥ अर्द्धरात्रयुताष्टम्यां सोश्वमेध
फलं लभेत् ॥ इति जयंती ॥ अथ ग्रहणं ॥ तत्र स्नानपूजादिकरणे ५२
फलं ॥ ब्रह्मवैवर्त्ते ॥ मन्वादिदिवसेष्वा मेयम्फलं स्नानपूजनैः ॥

भाद्रेमासिसिताष्टम्यांभवेत्कोटिगुणंफलं॥तस्यांतिथौवारमा

द्रेपितृणांयश्रयच्छति॥गयाश्राद्धंकृतंतेनयातनाहंनात्रसंशयः

ततोनियमः॥व्रतपूर्वदिनेसायंदंतधावनंतस्मात्तस्तिलैर्जले

स्नात्वाचांतःपठेत्॥ॐसूर्यःसोमोयमःकालःसंध्येभूतान्य

हःक्षपा॥पवनोदिक्पतिर्भूमिराकाशंखचरामराः॥ब्राह्मंशा

सनमास्थायकल्पध्वमिहसन्निधिः॥इत्युक्त्वाॐतद्विष्णोःप

रमंपदंसदापश्यंतिसूरयः॥दिवीवचक्षुराततं॥इतिविष्णुस्मर

रा.नि. त्।ततःस्मृतंतरे॥मासपक्षतिथीनांचनिमित्तानांचसर्वशः॥
४२ उल्लेखनमकुर्वाणोनतस्यफलभाग्भवेत्॥वराहपुराणे॥गृ
हीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः॥उपवासंतुगृह्णीयाद्यद्वा
र्यंवधारयेत्॥यद्देनिहितेनवारिधारयेत्॥इत्यर्थः॥उँतत्स
दद्येत्याद्युक्त्वासर्वपापक्षयपूर्वकश्रीकृष्णप्रीत्यर्थंश्रीकृष्णज
न्माष्टमीव्रतंकर्माहंकरिष्ये॥उँवासुदेवंसमुद्दिश्यसर्वपापप्र ४२
शांतये॥उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं॥अद्यकृष्णा

ष्टमीदेवीनभस्यंऽसरोहिणी। अर्चयित्वोपवासेनभोक्ष्येहमपरमे

हनि॥ एनसोमोक्तकामोस्मियद्गोविंदत्रिजन्मनं॥ तन्मेमुंचंतुमांत्रा

हिपतितंशोकसागरे। आजन्ममरणंपावघ्नमयादुःकृतंकृतं॥ त

त्प्रणाशायगोविंदप्रसीदपुरुषोत्तम॥ इतिनियमः। ततःपूजार्थं

सूतिकागृहमाहमविष्ये॥ जन्माष्टम्यांतिलैःस्नातोनद्यादौवि

मलेजले॥ सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहं॥ सितपीतै

स्तथारक्तैः॥ कर्बुरैर्हारितैःपृथक॥ वासोभिःशोभितंकृत्वा

समंतात्कलशैर्नीरैः।भक्ष्यैःफलैरनेकैश्चदीपालिभिरितस्ततः।पु
ष्पमालाविचित्रंचचंदनागुरुधूपितं।अभिरम्यमनोपम्यंरत्नाम
णिविभूषितं॥हारविमलमुक्ताजालैरलितंरत्नपालकैः॥षष्ट्यादे
व्याधिष्टितंचस्त्रीभिश्चस्वजनैस्तथा॥तन्मध्येप्रतिमास्थाप्यासा
चाप्यष्टविधास्मृता॥कांचनीराजतीताम्रीपैत्तकीमृन्मयीतथा
वार्क्षीमणिमयीचित्रवर्णैकैर्लिखिताथवा॥सर्वलक्षणसंपूर्णा
पर्य्यंकेचाहृतास्मृते॥प्रसुप्तांचप्रसृतोचस्थापयेन्मंचकोपरि॥

मंचापिबालकंसुप्तंपर्यंकेस्तनपायिनं॥यशोदातत्रसंस्थाप्या
प्रसूतवरकन्यका।वसुदेवंचसंस्थाप्यखड्गचर्मधरंतथा॥नंदंच
बलभद्रंचदत्तगर्गंचतुर्मुखं॥स्थंडिलेस्थापयेद्देवींसवंद्यारोहि
णींतथा॥चंद्रिकांबलदेवंचसंस्थाप्यसूतिकागृहे॥तत्रकंसनि
युक्ताश्चमोहितायोगनिद्रया।गोधेनुकुंजराश्चैवदानवाः॥श्वा
स्त्रपाणयः॥लेखनीयंचतत्रैवकालियंयमुनाह्रदं॥इत्येवमादि
यत्किंचिच्छकुनेचरितंमम॥लेखयित्वाप्रयत्नेनसोयवासः

प्रपूजयेत॥ प्रणवादिनमोंतं च पृथक्कृत्वा॥ मातृकीर्त्तयेत॥ कुर्या

रा॰नि॰ न्मूजां विधिवज्ञश्च सर्वपापप्रनुत्तये॥ अष्टैगात्रैव मोड्डारांपातयेत्कुडम पा

४४ पिषा॥ ॐ विश्वाय स्वाहेत्यग्रे स्त्रीलामात्रं च होमयेत॥ ततो वर्द्धाप

44 नं षष्ठीनामादेः कारणं मम॥ कर्त्तव्यं तन्महाप्राज्ञ श्रीभगवन्मामहो

त्सवं॥ अत्र वर्द्धापनं नालच्छेदनं षष्ठीमिति पूजयेत॥ इति शेषः॥

पूजयेयुर्द्विजाः सर्वे॥ स्त्रीशूद्राणाममंत्रकं॥ चंद्रोदये ग्रहाणां का

पद्यादर्घ्यं हरिं स्मरन॥ शंखतोयं समादाय सपुष्पकुशचंदनं ४४

जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत ॥ क्षीरोदार्णवसंभूत अत्र
त्रिनेत्रसमुद्भवः ॥ गृहाणार्घ्यं शशांकोयं रोहिण्या सहितो मम ॥
ततः श्रीकृष्णं प्रार्थयेत ॥ यद्बाल्ये यच्च कौमारे ॥ यौवने यच्च वार्द्ध-
के ॥ तत्पुण्यं वृद्धिमाभ्रोति पापं हर हलायुध ॥ ततः स्तोत्रैः स्तुतिं कृ-
त्वा वासुदेवं जनार्दनं ॥ गीतवादित्रनृत्यैश्च शेषं कालं यथासुखं
सब्रह्मवासुदेवाय गोब्राह्मणहिताय च ॥ शांतिरस्तु शिवं चास्तु ॥ इ-
त्युक्त्वा तां विसर्जयेत ॥ ततः प्रातर्नवम्यां च दानं कुर्याद्यथाविधिः

रा.नि.
४५
45

संकल्पेनविनाविप्रयत्किंचित्क्रियतेनरः॥फलंचाल्पाल्पकंत
स्य॥धर्मस्यार्द्धतमोभवेत्॥अलोकमितात्पर्यार्थविवरणमर्हत
योभवेदिति॥सुवर्णमेदिनीगाश्ववासांसिकुसुमानिच॥यद्यदि
ष्टतमंलोकेकृष्णोमेप्रीयतामिति॥अत्रव्रतोद्यापनमनुक्तं॥एवं
यःकुरुतेदेव्यादेवकामममहोत्सवं॥वर्षेवर्षेभगवतोमेभक्त्या
धर्मनंदनः॥नरोवायदिवानारीयथोक्तफलमाप्नुयात्॥पुत्रसं
तानमारोग्यधनधान्यमर्द्धिमद्गृहं॥इतिपूजाविधानं॥अथपारण ४४

पुराकृतंकर्मउपवासार्जितंफलं हेमाद्रौ निर्णयामृते चैवमांतेच

माह ॥ ब्रह्मवैवर्ते ॥ अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित्
हन्यात्‌ ं ॥ अथपारणमाह ॥ ब्रह्मवैवर्ते ॥ अष्टम्यामथरोहिण्या
नकुर्यात्पारणंयत्रचोच्यते ॥ यामत्रयोर्द्ध्वगामिन्यांप्रातरेवहिपार
णं ॥ द्वयशाकौ ॥ शाकौतुब्रह्मांडपुराणे ॥ नरात्रौपारणंकुर्यादृतेवै
रोहिणीव्रतात ॥ तत्रनिश्यपितत्कुर्याद्वर्जयित्वामहानिशां ॥ का
लादर्शेकालमाधवीयेपि ॥ निर्णयामृतेचोत्सवांतेवाव्रतीकुर्यात्तुपा
रणामिति ॥ उत्सवांतेजागरणाद्युत्सवांते ॥ इतिजन्माष्टमी ॥ अथ

रा॰नि॰
४६
46

भाद्रशुक्लाष्टमीदूर्वाष्टमीत्युच्यते॥ भविष्ये॥ शुक्लाष्टमीतिथिर्या
तुमासिभाद्रपदेभवेत्॥ दूर्वाष्टमीतुसाज्ञेयानोत्तरासाविधीयते॥
इयंचपूर्वविद्धाग्राह्या॥ तदुक्तंपद्मपुराणे॥ श्रावणीदुर्गनवमी॥ दू
र्वाचैवहुताशनी॥ पूर्वविद्धातुकर्तव्याशिवरात्रिर्बलेर्दिनं॥ दूर्वाष्ट
मीचज्येष्ठामूलेविद्धायरोहिणमुहूर्तव्यापिनीकर्तव्या॥ रोहिणद्
तिनवमीमुहूर्तः॥ तदुक्तंनिर्णयामृते॥ मुहूर्तेरोहिणीष्टम्यांपूर्वावा
यदिवापरा॥ दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेत्॥ स्मृत्यंतरे

दूर्वाष्टमीसदात्याज्याज्येष्ठमूलर्क्षसंयुता॥ ऐंद्रर्क्षेपूजितादेवीहन्यप
मानिनामथ्या॥ भर्तुरायुर्हरामूलेनतस्मात्तांपरिवर्जयेत्॥ स्कांद
पुराणे॥ मासिभाद्रपदेशुक्लेदूर्वासंज्ञातथाष्टमी॥ सिंहार्कएवा
कर्तव्यानकन्यार्केकदाचन॥ सिंहस्थेसोत्तमासूर्येऽनुदितेमुनि
सत्तमेति॥ अस्यायमर्थः॥ यदातुसिंहस्थसूर्ये॥ असंक्रांतोमासः
प्रवृत्तस्तदाभाद्रपदप्रवृत्त्याएकातच्छुक्लाष्टमीसिंहसूर्ये॥ अन्या
चकन्यासूर्येप्रवृत्तनयातत्रयद्धिद्वितंकर्मउत्तरेमासिकारयेत्॥ ३

रा॰नि॰
४७

47

न्यादिपूर्वोक्तसर्षकरणीय॥ वाक्यादारभ्यतद्दिनमकन्यार्केयैभा
द्राष्टम्यांप्रशक्तौतन्निराकरोति॥ अतएवद्विर्भाद्रंविनाकन्यार्केयै
भाद्राष्टमीयातेपितत्रव्रतकरणेनिषेधः॥ निषेधस्तुप्रथमारंभः
अत्रचेज्ज्येष्ठामूलंयदाभवेत॥ दूर्वामभ्यर्चयेद्भक्त्यानवंध्यांदिव
संनयेत्॥ एतद्व्रतंपुरुषस्यकाम्यं॥ तदुक्तंभविष्योत्तरे॥ मासिभा
द्रपदेपक्षेशुक्लेष्टम्यांयुधिष्ठिर॥ दूर्वाष्टमीव्रतंपुण्यंयःकरोति
चमानवः॥ नतस्यक्षयमाप्नोतिसंतानंसामपौरुषं॥ नंदंतेवर्द्धते

नित्यंयथादूर्वातथाकुलं॥भविष्ये॥महापुण्यापापहराऽष्टमी
दूर्वसंज्ञिता॥चतुर्णामपिवर्णानांस्त्रीजनानांविशेषतः स्त्रीणां
नित्यंकाम्यंच॥अकरणेदोषंचकरणेफलमाहपुराणसमुच्चये
धानपूजयतेदूर्वांमोहादिहयथाविधिः॥त्रीणिजन्मानिवैधर्मंल
भतेनात्रसंशयः॥तस्मात्संपूजनीयासाप्रतिवर्षंबधूजनैः सदा
संतानजननीभर्तुः सौख्यकारीतथा॥अत्रनिषिद्धदिनेब्राह्मण
द्वारापूजाकार्या॥अत्रकृत्यसमुच्चयंभविष्ये॥शुचौदेशेप्रजातायां

रा॰म॰

४८

48

दूर्वायां ब्राह्मणो नमः ॥ स्थाप्य लिंगं ततो गंधैः पुष्पैः धूपैः समर्च
येत् ॥ दध्यक्षतैर्नैवेद्यैर्द्विजश्रेष्ठ ॥ अर्घ्यं दद्यात्त्रिलोचने ॥ दूर्वाग्रामीभ्यां
विधिवत्पूजयेद्बुद्धयायुत ॥ तत्र मंत्रः ॥ त्वं दूर्वेऽमृतजन्मासि वं
दितासि सुरासुरैः ॥ सौभाग्यं संततिं देहि सर्वसिद्धिकरी भव ॥ य
था शाखाप्रशाखाभिर्विस्तृतासि महीतले ॥ तथा ममापि संता
नं देहि त्वमजरामरं ॥ अथ भक्ष्यभुक्तं भविष्ये ॥ अनग्निपक्वमः
श्रीयाद्दन्नं दधि फलं तथा ॥ अक्षारलवणं ब्रह्मन्नश्रीयाद्ब्रह्म

धुनान्वितं ॥ अथास्यां महालक्ष्मीयात्रोक्ता काशीखंडे ॥ महालक्ष्मा
ष्टमीं प्राप्य तत्र यात्राकृतं नृणां ॥ संपूजनेह विधिवन्मध्यानसंनमु
चति ॥ व्रतं वंधमत्र षोडशावर्षपर्यंतं यात्रा कुर्युरिति षोडशावर्षांतत
दुतोद्यापनं ॥ चंद्रप्रकाशे ॥ अर्द्धरात्रमतिक्रम्य वर्तते यो नरा तिथिः
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदेति ॥ अथाश्विनशुक्ला
ष्टमी महाष्टमी सूच्यते ॥ ब्रह्मपुराणे ॥ नवाष्टम्यां भद्रकाली दक्षय
ज्ञविनाशिनी ॥ प्रादुर्भूता महाघोरा योगिनीकोटिभिर्वृता ॥ अतो

त्रपूजनीयातस्मिन्नहनिमानवैः॥ इयंचाष्टमीनवमीयुताग्राह्या
स्मृतिसंग्रहे॥ आरभ्यसदाष्टमीपूजानवमीसंयुतासदा॥ सप्तमीसंयु
तानित्यंशोकसंतापकारिणी॥ तथाचदेवीपुराणे॥ सप्तमीलेशसं
युक्तावर्जनीयासदाष्टमी॥ लेशकापिसाष्टमीपुण्यायस्यांसूर्योदयो
भवेत्॥ लेशकाल्पकलाकाष्ठादिमात्रापीत्यर्थः॥ दिनद्वयेचेद्युग
व्यापित्वे॥ संपूर्णत्वात्पूर्वैवद्धयमेवभौमयुतातिप्रशस्ता॥ स्मृत्यंतरे
यष्टम्यामुदितेसूर्ये॥ दिनांतेनवमीभवेत्॥ कुजवारोभवेत्तत्रपूज

नीयाश्रयत्नतः ॥ अत्रनवमीयुतालाभेसप्तमीयुतैवकार्या ॥ नत्वष्ट
म्येवा ॥ सप्तम्यापियुताकार्यामूलेनापिविशेषतः ॥ इत्यादीनिवच
नानीति ॥ नवरात्राशक्तौत्रिरात्राद्युक्तं ॥ देवीपुराणे ॥ नवरात्रव्रते
शक्तास्त्रिरात्रमेकरात्रकं ॥ व्रतंचरितयोभक्त्यासप्तम्यादासमिवां
छितं ॥ केवलाष्टम्युपवासस्तुपुत्रवतानकार्यः ॥ उपवासंमहाष्ट
म्यांपुत्रवान्नसमाचरेत ॥ यथातथावापूतात्माव्रतीदेवींसम
र्चयेत ॥ इतिकालिकापुराणे ॥ इतिमहाष्टमी ॥ अथकार्तिकस्ना

रा॰नि॰
५०
50

ष्टमीलक्ष्मीकाल्यादिस्तत्रश्राद्धादिकंकार्यंनदत्तयमुक्तं ॥ इयमेवा
ष्टमीचाहोईतिप्रसिद्धातत्रस्त्रीभिः सौभाग्यकामनयाराज्ञौ ॥ प्र
थमीजातेप्रतपूर्वकपूजाकालव्यापिनीयमष्टमीग्राह्यादिनद्व
येचेत्पूर्वैवेति ॥ कार्तिकशुक्लाष्टमीगोष्ठाष्टमीत्युच्यते ॥ साचन
वमीयुताग्राह्यायुग्मवाक्यात ॥ निर्णयामृतेस्कांदेच ॥ शुक्लाष्ट
मीगोष्ठाष्टमीत्युच्यते ॥ साचनवमीयुताग्राह्यायुग्मवाक्यात्
निर्णयामृतेस्कांदेच ॥ शुक्लाष्टमीकार्तिकेतुस्मृतागोष्ठाष्टमी

प्सि

च्य

बुधैः॥ तत्रपूजाकर्त्वापूजागोग्रासंगोप्रदक्षिणं॥गवानुगमनंका
र्यैसर्वान्कामानभी तान्॥अथमार्गकृष्णाष्टमीकालभैरवाष्ट
मीत्युँते॥ब्रह्मवैवर्ते॥कृष्णपक्षेषुसर्वेषुकर्तव्यासंमुखीतिथिः॥
संमुखीसायाह्नव्यापिनी॥दिनद्वयेचेत्पूर्वैव॥अत्रकाशीवास
निर्विघ्नतीर्थंकालभैरवोक्ता॥काशीखंडे॥कृत्वाचविविधांपू
जांमहासंभारविस्तरैः॥नरोमार्गसिताष्टम्यांवार्षिकंविघ्न
मुत्सृजेत॥तीर्थेकालोदकेस्नात्वाकृत्वातर्पणमत्परः काल

भैरवमालोक्यनिरयाद्बुद्धरेत्पितॄन्॥ अत्रव्रतंचनागोणमुक्तं।
ग्रं॰नि॰ अथत्रिस्त्रोष्टकाः॥ आसेपितृदानायपौषाद्यारष्टकास्तिस्त्र।
५१. एवच॥ कृष्णपक्षेवरिष्ठाहिपूर्वाचैन्द्रीविभाव्यते॥ प्राजापत्या।
51 द्वितीयास्यात्तृतीयावैश्वदेविका॥ पौषेपूपैःसदाकार्यामाघे।
मासेतुजमांसच॥ कर्त्तव्याफाल्गुणेशाकैरेषद्रव्यगतोविधिरिति।
महालयेचतुर्थ्यास्यात्सैवाप्यापापसेनवै॥ इतिमतांतरात्॥
अत्रापराह्णोग्राह्यः॥ इतिश्राद्धीयचतुरष्टकाः॥ अथमाघशुक्ला

ष्टमी भीष्माष्टमीत्युच्यते ॥ सा तु नवमीयुता ग्राह्या युग्मवाक्यात

तत्कृत्यं पाद्मे ॥ माघमासि सिताष्टम्यां सलिलं भीष्मतर्पणं श्रा

द्धं च ये नराः कुर्युस्ते स्युः संततिभागिनः ॥ तर्पणमंत्र भारते ॥ भी

ष्मः ॥ शांतनवो वीरः ॥ सत्यवादी जितेंद्रियः ॥ आभिरद्भिरवाप्नो

तु ॥ पुत्रपौत्रोचितां क्रियां ॥ वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च

अपुत्राय ददाम्येतज्जलं भीष्माय वर्म्मणे ॥ ततोर्घमंत्रः पाद्मे ॥ व

सूनामवताराय शंतनोरात्मजाय च ॥ अर्घ्यं ददामि भीष्माय ॥ आ

दा॰नि॰
५२

52

जन्मब्रह्मचारिणः॥स्मृतंनरैः॥ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मा
यनोजलं॥संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमः॥इदंचजीव
त्पितृकोपिकुर्यात्निषेधाभावात्॥तदुक्तंभविष्योत्तरे॥यदायदा
सिताष्टम्यांबुधवारोभवेद्यदि॥तदातदाहिसाग्राह्याएकभक्ता
शनेनृप॥बुधाष्टमीतुसंपूर्णायथोक्तफलदायिनीति॥तथा
पियाबुधाष्टमीनिषिद्धासोच्यतेतत्रैव॥सायंकालेनद्याचैत्रेप्र ५२
सुप्तेचजनार्दने॥बुधाष्टमीनकर्तव्याहंतिपुण्यंपुराकृतं॥सायं

काले॥ इतिसायंकालपर्यंतमात्रस्यशौंमर्थः॥ नद्याचवलंडति
थ्यिर्नकर्त्तव्येति॥ नासपर्योर्थः॥ पूर्ववाक्येसंपूर्णोमनुरोधात॥ श्र
त्रा[illegible]ष्टमीनामष्टधाभस्समाहृतत्रैव॥ प्रथमामोदकैःकार्या
द्वितीयागुणकैर्नृपः॥ तृतीयाघृतखंडैश्चचतुर्थीवटकैः॥ सि
तैः॥ पंचमीशुभ्रकासारैः॥ षष्ठीपादाभिरुच्यते॥ सप्तमीत्वाकु
लीभिश्चफेणीभिःमितयाष्टमी॥ एवंक्रमेणकर्त्तव्यासुहृ
त्वजनबांधवैः॥ मद्दैकत्रस्थितैर्भोज्याभोक्तव्यंप्रीतिपूर्वकं

रा॰नि॰
५३

53

एतद्व्रतस्यफलंपुत्रपौत्रधनधान्यसमजन्मपर्यंतंजातिस्मरत्व
मुक्तं ॥ इतिबुधाष्टमी ॥ तथाचतिथितत्वे ॥ शनैश्चरस्य[illegible]
वारेणवारेणांगारकस्यच ॥ कृष्णाष्टमीचतुर्दश्यौ ॥ पुण्यात्पुण्य
तरेस्मृते ॥ अत्रयत्क्रियतेपापमथवाधर्मसंचयः ॥ षष्टिव
र्षसहस्राणिप्रतिजन्मतदक्षयमिति शुक्लाष्टम्यांदिवानभोक्त
व्यं ॥ तद्दुःखंभविष्यि ॥ भूताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वाचपर्वणि
एकादश्यांदिवारात्रौभुक्त्वाचांद्रायणंचरेत ॥ अत्राष्टमीमहि

मा॥ तिथितत्वे॥ एकादशीं [illegible] सितोष्टमी

पर्वतराजपुत्र्याः॥ ततोपिशुक्लागुणिताग्रातेनतपराशरव्यासवसि

ष्ठमुख्यैः॥ इत्यष्टमीनिर्णयः॥ अथनवमी॥ सात्रपूर्वयुतैवयुग्मवा

क्यात्॥ चैत्रशुक्लनवमीरामनवमीत्युच्यते॥ सापरविद्धाम

ध्याह्नव्यापिनीग्राह्या॥ तदुक्तमगस्त्यसंहितायां॥ चैत्रशुक्लाच

नवमीपुनर्वसुयुतायदि॥ सैवमध्याह्नयोगेनमहापुण्यतमा

भवेत्॥ चैत्रमासनवम्यांतुजातोरामः॥ स्वयंहरिःपुनर्वसुसंयु

नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां
वै दशम्यां पारणं भवेत्

कामातिथिः ॥ सर्वकामदा ॥ केवलापि सदोपोष्यनवमीत्राह्सं
ग्रहात् ॥ तस्मात्सर्वात्मना सर्वैः ॥ कार्यं वै नवमीव्रतं ॥ उपोषणं जा
गरणं [illegible]पितॄनुद्दिश्य तर्पणं ॥ तस्मिन् दिने तु कर्त्तव्यं ब्रह्म
प्राप्तिमभीप्सुभिः ॥ अत्र पूर्वदिन एव मध्याह्नव्यापिनी चेत्पूर्वा ॥
दिनद्वये तद्व्याप्तावव्याप्तावेकदेशव्याप्तौ चसनं तत्रा चेत्पू॰र्वा
न्यथोत्तरे पि ॥ अष्टमीविधानिषेधात् ॥ यस्तु रामनवम्यां तु भुंक्ते मो
हाद्विमूढधीः ॥ कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः ॥ इत्मकर

णामृतसमवायश्चेतेनिमित्तं ॥ पुराणांतरे ॥ सूर्यग्रहेकुरुक्षेत्रेमहादानैःकृ
तैःमुहुः ॥ यत्फलंसमवाप्नोतिश्रीरामनवमीव्रतात् ॥ इति ॥ श्राव
णशुक्लनवमीगौरीनवमीनुप्रसिद्धा ॥ सातुपूर्वयुतैवग्राह्यातत्र
सौभाग्यकामेन ॥ याश्चस्त्रीभिस्तद्विधानंविधेयमितिस्कांदे ॥ फलस्य
तेश्वकाम्यंव्रतमिदमुक्तं ॥ यत्तुतज्जन्मनामेवनित्यमितिमंकेचि
मानाभावात् ॥ जन्माष्टमीशिवरात्र्यादिव्रतेपितथापत्तेः ॥ अथराम
नवम्यांप्रातःस्नानादिकंविधायव्रतनियमंगृहीत्वायथोक्तवि

रा॰नि॰
५५

55

यिनाश्रीरामपूजादिकं कृत्वाश्वोभूते ब्राह्मणभोजनं कारयित्वाद-
क्षिणां दत्वा पारणं कुर्यात ॥ आश्विनकृष्णनवमी अष्टका साकुतु-
पकालव्यापिनी स्यात ॥ श्राद्धे ॥ अष्टकान्वष्टकास्विस्त्वलथेवचन-
पोतम: ॥ एतानि श्राद्धकालानि नित्यान्याह प्रजापतिः ॥ श्राद्धमे-
तेष्वकुर्वाणो नरकं प्रतिपद्यते ॥ अत एव स्मृतं त्रं प्रधानं नाष्टकांगं पू-
र्वेद्युः श्राद्धं त्वष्टकांगं पौषमाघफाल्गुणेषु तिस्रोष्टकाश्चतुर्थीमहाल-
ये च तत्र केवलायां नवम्यां श्राद्धमन्वाँष्टक्यं ॥ तदाह ॥ सर्वासामेव- व

मातृणां श्राद्धं कन्यागते रवौ ॥ नवम्यां हि प्रदातव्यं श्रद्धलब्धवरानयः

सर्वासां सपत्निमातृणां ॥ इति मातृनवमी ॥ आश्विन शुक्लनवमी महानवमी

मुच्यते ॥ लैंगे तद्युक्तं ॥ दुर्गापूजास्तु नवमीमूलनक्षत्रयान्विता ॥ म

हती कीर्तितातस्यां दुर्गां महिषमर्दिनीमिति पूजयेदिति शेषः ॥

तत्र पूर्वयुतैव ग्राह्यायुग्मवाक्यात ॥ हृदयमोपि ॥ श्रावणी दुर्गनव गं

मी दूर्वा चैव ऊनाशिनी ॥ पूर्वविद्धैक तर्तव्या शिवरात्रिर्बलेर्दिने ॥ स्त्र

स्यामेव दुर्गापूजनबलिदानादिकार्यमिति ॥ राजमार्तंडे ॥ नवम्यां

रा·नि·
५६

56

चनपंहोमंसमाप्यविधिवद्बलिमिति॥ब्रह्मवैवर्ते॥अत्रापराह्णि
केकालेबलिदानंप्रशस्यते॥दशमींवर्जयेत्तत्रनात्रकार्यविचार
णा॥इति॥होमद्रव्यंरुद्रयामले॥प्रधानद्रव्यमुद्दिष्टंपायसान्नंतिला
स्तथा॥किंशुकैःसर्षपैःपुंगैर्लाजादूर्वांकुरैरपि॥यवैर्बिल्वश्रीफलै
ना र्दिव्यैर्नानाविधफलैरपि॥रक्तचंदनखंडैश्च गुग्गुलैश्चमनोहरैः
होमयेद्विधिवत्कन्यादशांशेनसमाहितः॥सप्तसप्ततिश्लोकंस
र्वद्रव्याणिहोमयेत॥नवार्णेरणवाकृत्यानमोदेव्या॥इतिचैत॥अग्नि ई.

पुराणे॥ ॥ मूर्द्धानं दिवमंत्रेण संस्रवेण च धारया॥ दद्यादन्यायपूर्णां

वेनोयदिस्पकरा च नेति॥ शांतिदीपिकायां॥ ऐशान्यामावाहरेत्रस्म

स्रुचयावास्रवेण च॥ वंदनं कारयेत्तेन शिरः॥ कंठांसकेषु चेति॥ स्व

ष्टमंत्राग्नागरं कुर्यान्नवमांपारणं तथा॥ विसर्जनं दशम्यां स्यादभि

षेकश्च माधवेति॥ दशम्यामिश्रितायत्र पारणे नवमी भवेत॥ स

प्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यति॥ योमोहात्पारणं कुर्यादष्टम्यामे

दिवसेविभो॥ तद्राष्ट्रं नाशमायाति दुर्भिक्षादिर्भवेत॥ नृपहीनं भ

मयं

रा॰नि॰
५२

57

वेद्राष्टंद्दशम्यांपारणेकृते॥ तस्मात्तुपारयेदेवनवम्यांभक्तितत्परः
नवम्यांपारितादेवीकुलवृद्धिंप्रयच्छति॥ तस्मात्तुपारणंकुर्यान्नव-
म्यांविबुधर्षिपेति॥ देवीपुराणादेश्च॥ नवम्यामेवनवरात्रपारणमि-
त्याहुः रुद्रयामले॥ मूलकेपारणंकुर्यान्नवम्यांहोमपूर्वकमि-
ति॥ तथाचमत्स्यव्रतः॥ प्रारब्धदीर्घतपसांनारीणांयोरजोभवेत्॥
नतत्रापिव्रतस्यस्यादुपरोधः॥ कदाचनेति॥ वाक्यतोरजोदर्शनम-
ध्योपिस्त्रीभिःकार्यः॥ कार्तिकशुक्लनवमीएषायुगादिः सापूर्वा-

न्हव्यापिनी ग्राह्या ॥ तदुक्तं पाद्मे ॥ कार्त्तिके शुक्लनवमीमवाप्य विनि
र्तेन्द्रियः ॥ हरिं विधाय सौवर्णं तुलस्यासहितं विभुं ॥ पूजयेद्विधि
वद्भीरुव्रती तत्र दिनत्रयं ॥ एवं यथोक्तविधिना कुर्याद्वैवाहिकं वि
धिं ॥ पुराणांतरे ॥ शुक्लपक्षे नवम्यां च कार्त्तिकस्य समादितः ॥ स्ना
याद्दद्यान्नमस्तुर्यां दत्तयं लभते फलं ॥ इति नवमीनिर्णयः ॥ अथ
दशमी ॥ ज्येष्ठशुक्लदशमी दशहरा ॥ ब्राह्मे ॥ ज्येष्ठे मासि सिते पक्षे
दशमी हस्तसंयुता ॥ हरते दश पापानि ॥ तस्माद्दशहरा स्मृता ॥ इति

दशपापान्याहमनुः ॥ पारुष्यमनृतंचैवपैशुन्यंचापिसर्वशः ॥ असंब-
द्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं ॥ अदत्तानामुपादानंहिंसाचैववि-
धानतः ॥ परदारोपसेवाचकायिकंत्रिविधंस्मृतं ॥ परद्रव्ये ॥ ष्वभिध्या-
नमनसानिष्टचिंतनं ॥ वितथाभिनिवेशश्चत्रिविधंकर्ममानसं । स्कां-
देपि ॥ ज्येष्ठमासिसितेपक्षेदशम्यांबुधहस्तयोः ॥ गरानंदव्यतीपाते
कन्याचंद्रेवृषेरवौ ॥ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते ॥ इयं
चयोगविशेषेणपूर्वापरावाग्राह्या ॥ काशीखंडे ॥ दशाश्वमेधिके ।

स्नात्वा सर्वपापैः प्रमुच्यते सर्वपातकैः ॥ लिंगे दशाश्वमेधेशं दृष्ट्वा द-
शहरातिथौ ॥ दशजन्मार्जितैः पापैः मुच्यते नात्र संशयः ॥ यदा ज्ये-
ष्ठो मलमासो भवति तदा मलमास एव कार्यं ॥ हेमाद्रौ ॥ दशहरास्ना-
नोत्कर्षश्चतुर्ष्वपि युगादिषु ॥ उपाकर्ममहाषष्ठ्योर्हो ॥ तदुक्तं दृषा-
दिन ॥ इति ॥ आश्विनशुक्लदशमी विजयदशमीत्युच्यते ॥ सानक्ष-
त्रोदयव्यापिनी ग्राह्या ॥ तदुक्तं रत्नकोशे ॥ ईषत्संध्यामतिक्रांतः ॥ किं-
चिदुद्भिन्नतारकः ॥ विजयो नाम कालोऽयं सर्वकार्यार्थसाधकः ॥

इतिचिंतामणावपि ॥ आश्विनस्यसितेपक्षेदशम्यांतारकोदये ॥ स
ग॰नि॰ कालोविजयोज्ञेयः ॥ सर्वकार्यार्थसिद्धये ॥ दिनद्वयेतद्व्याप्तौपूर्वै
५९ वयापूर्णानवमीयुक्तातस्यांपूज्यापराजिता ॥ क्षेमार्थंविजयार्थंच
पूर्वोक्तविधिनानरैः ॥ नवमीशेषयुक्तायांदशम्यामपराजिता
ददातिविजयंदेवीपूजिताजयवर्द्धनी ॥ एकादश्यांप्रकुर्वीतपू
जनंचापराजितं ॥ इतिस्कांदे ॥ अत्रैव ॥ दशमींयःसमुल्लंघ्यप्र
स्थानंकुरुतेनरः ॥ तस्यसंवत्सरंराज्येनक्वापिविजयोभवेत् ॥ दिन ५९

द्वयेनतारकोदयकालाभावे परदिने एकादशो मुहूर्तो यात्राकार्या ॥ आ

श्विनस्य सिते पक्षे दशम्यां सर्वरात्रिषु ॥ सायंकाले शुभा यात्रा दिशा

वि

वां नियतक्षणे ॥ एकादशो मुहूर्तो यो विजयः परिकीर्तितः ॥ तस्मिन्स

र्वे विधातव्या यात्रा विजयकांक्षिभिरिति ॥ भृगुश्रुतौ ? पूर्वदिने एकाद

शो मुहूर्तस्यासंभवे पि श्रवणयोगश्चेत् देवग्राह्या ॥ उदये दशमी

किंचित्संपूर्णैकादशी यदि ॥ श्रवणर्क्षं यदा काले सा तिथिर्विजया

भिधेति ॥ मदनरत्ने दक्षोक्तेः ॥ श्रवणर्क्षे तु पूर्णायां काकुत्स्थः ॥ प

रा॰नि॰
६०
60

स्थितोयतः॥ उल्लंघ्ययेयुः॥ सीमानंसमानर्द्वैततेनराः॥ इतिभवि
ष्योक्तेश्च॥ अत्रकृतंभविष्योत्तरे॥ शमीमलत्तणोपेतामीशानाशाम
तिष्ठितां॥ संप्रार्थ्यतांचसंपूज्यत्वेशानीमन्मूलेभवेत्॥ शमीसमया
तेपापंशमीलोहितकंटका॥ धारिण्यर्जुनबाणानांश्रीरामप्रिय
वादिनी॥ करिष्यमाणयात्रायांयथाकालंसुखंमम॥ तत्रनिर्विघ्न
कर्त्रीत्वंभवश्रीरामपूजिते॥ गृहीत्वासात्ततामार्द्रांशमीमूलगतांम
दं॥ गीतवादित्रनिर्घोषैरानये[illegible]त्स्वगृहंप्रति॥ इतिदशमीनि

णेय ॥ अथैकादशी ॥ तत्रोपवासो नित्यः काम्यश्च ॥ तत्राद्यमाह
सनत्कुमारः ॥ न करोति हि यो मूढ एकादश्यामुपोषणं ॥ स नरो न
रकं याति रौरवं तमसावृतं ॥ इति गारुडे ॥ उपोष्यैकादशी नित्यं पक्ष
योरुभयोरपि ॥ काम्यस्तु कौर्मे ॥ यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमा
त्मनः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ तत्राधिकारी कामा
यनः ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न्यूनवत्सरः ॥ एकादश्यामुप
वसेत्पक्षयोरुभयोरपि ॥ अष्टवर्षाधिक इत्युपनयनोत्तरत्वस्योप

ए॰नि॰
६२
61

लक्षणं॥ अपिवावेदतुल्यत्वादुपायेनप्रवृत्तेरन्निति षष्ठस्यापितत्वा
एतच्चगृहस्थस्यव्यतिरिक्तपरकीर्मे एकादश्यांनभुंजीतपक्षयोरुभ
योरपि॥ वनस्थपतिधर्मोयंशुक्लामेवसदागृह्णीति॥ भविष्येएकाद॰
श्यांनभुंजीतपक्षयोरुभयोरपि॥ ब्रह्मचारीचनारीचशुक्लामेवसदा
गृह्णीति॥ ब्रह्मचारीप्रथमाश्रमी॥ नारीविधवा॥ सधवापक्षद्वये॰
पिनिषेधः॥ पत्यौजीवतियानारीउपोष्यव्रतमाचरेत्॥ आयुष्यंहर॰
तेभर्तुः॥ सनारीनरकंव्रजेत॥ इतिविष्णूक्तेः॥ यद्देवाभ्यायश्चपित्रा॰

दिकेभ्यः॥ कुर्यात्स्नातोभ्यर्चनंसत्क्रियांच॥ तस्यांईसाफलंनान्यस्त्रि
तानारीभुंक्तेभर्तृशुश्रूषयैवेतिभयापन्नमृतेनैवव्रतादीनांचरेत्स
दिति॥ कात्यायनोक्तेःपाद्मे॥ शयनीबोधनीमध्ये॥ याकृष्णैकादशी
भवेत॥ सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचन॥ एतच्चापुत्रगृ
हिविषयं॥ पुत्रवतस्तत्रापिनिषेधः॥ संक्रांत्यामुपवासश्चकृष्णैका
दशिवासरे॥ चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृहीति॥ नारदो
क्तेः॥ विधवायावनस्थस्ययतेश्चैकादशीद्वये॥ उपवासोगृहस्थ

सशुक्लायामेवपुत्रिणः ॥ इतिहेमाद्रौकामाख्यायांब्रह्मायंवा नदा
रा॰नि॰ हनारदः ॥ पुत्रवांश्चसभार्यश्चवंधुयुक्तस्तथैवच ॥ उभयोःपक्षयो॰
६२ काम्यं ॥ व्रतंकुर्यात्तुवैस्नवमिति ॥ वैस्नवैस्तुहस्मामुपोष्यमाह ॥ नि
62 त्यंभक्तिसमायुक्तैर्नरैर्विस्नुपरायणैः ॥ पक्षेपक्षेचकर्तव्यमेकादश्युपा
सभार्यश्च मुपोषणं ॥ सपुत्रश्चसजनोभक्तिसयुतः ॥ एकादश्यामुपवसेत्पक्ष
योरुभयोरपि ॥ तत्रैकादशीद्विधा ॥ शुद्धैकादशीवेधाच ॥ त्यायगरुडे वा
उदयात्प्राग्यदाविप्रमुहूर्तद्वयसंयुता ॥ संपूर्णैकादशीज्ञेयातत्रै॰

अरुणोदयकालेतु दशमीयदि दृश्यते सा विद्धैकादशी तत्रपापमूलमुपोषणं

वोपवसे गृहीति ॥ गृही वैष्णव: स्मार्तेनविषयेनुतन्नैव ॥ आदित्योदय
वेलायामारभ्यषष्टिनाडिका ॥ संपूर्णैकादशीनामकार्याधर्मफ
लेप्सुभिरिति ॥ दशमीविद्धापिद्वेधा ॥ अरुणोदयेसूर्योदयेचदश
मीसत्वेन ॥ तत्रभविष्यपुराणे ॥ अरुणोदयवेलायांदशागंधोभ
वेद्यदि ॥ इष्टंतत्तुप्रयत्नेनवर्जनीयंनराधिप ॥ दिशाद्दशमी ॥ द
शमीशेषसंयुक्तापदिस्यादरुणोदय: ॥ नैवोपोष्यंवैष्णवेनतद्दि
नैकादशीव्रतं ॥ इत्यादिभिर्वाक्यैररुणोदये ॥ दशमीसत्वएका

दशी विद्धा ॥ यदापि सौरधर्मे ॥ आदित्योदयवेलायां प्राङ्मुहूर्तद्व
यान्विता सैकादशी तु संपूर्णा विद्धान्या परिकीर्तिता ॥ तदपि अ
रुणोदयवेलायां दशमीसत्वे एकादश्या विरुद्धत्वपरं मुहूर्तद्व
यस्मादरुणोदयपरिमाणत्वात् ॥ गर्गः ॥ पंचपंचउषःकालः स
सपंचारुणोदयः ॥ अष्टपंचभवेत्प्रातः ॥ शेषं सूर्योदयः स्मृतः ॥
अत एव वृद्धमाडौ ॥ निशि प्रांते च यामार्द्धं प्रभाते देववादने ॥ मास्व
तानध्यायते चारुणोदय उच्यते ॥ यामार्द्धमपि मुहूर्तद्वयमेव ॥

यत्तु ॥ उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदय उच्यते ॥ यामार्द्ध
मपि मुहूर्त्तद्वयमेव ॥ यत्तु ॥ उदयात्प्राक् चतस्रस्तु नाडिका अरु
णोदय ॥ इति ॥ तदपि द्वात्रिंशद्घटिकारात्रिमानपक्षे मुहूर्त्तद्वय
स्य तावत्परिमाणत्वादुक्तमिति ॥ तातचरणाः ॥ यदपि ब्रह्मवैव
र्त्ते ॥ चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ॥ चतुष्टयविभागे
त्र वेधादीनां किलोदितः ॥ अरुणोदयवेधः स्यात्सार्द्धं तु घटि
कात्रयं ॥ अतिवेधो द्विघटिकः प्रभातं घटिकाद्रवेः ॥ महावे

रा.नि.
६४

घ्रोपितत्रैवदृश्यतेकोंनदृश्यते॥ तुरीयस्तत्रहितोयोगः सूर्योद
येमत्स्यरुणोदयवेधानिवेधमाह॥ वेधयोगसंज्ञाकरणमर्वाग्दा
पातित्र्यायार्थं॥ सार्द्धंतुघटिकात्रयं॥ चतस्रोघटिकाऽस्तनुगत
स्यव्यवहारार्थंतावत्परिमाणमुहूर्तद्वयस्यरात्रिमानवशेनक
दाचित्संभवान्मुहूर्तद्वयारुणोदयपरमेवयत्तु॥ त्रयस्त्रिवर्ते॥ स्र
ईशात्रैतुकेषांचिदृशाम्यावेधइष्यते॥ कपालवेधइत्याऊराचा
र्यायेहरिप्रियां॥ इतितत्रैकेमुनिकरीत्याऽरुणोदयवेधनिदर्शं

मितिमाधवः॥ यदपि। नागोद्वादशनाडीभिर्दिक्पंचदशाभिस्तथा
भूताष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति स्कांदे। ननतथवस्यो-
क्तानि यामे॥ सर्वप्रकारवेधोयमुपवासस्य दूषकः॥ साऽङ्गसममस्तुहू-
तेस्तु योगो यं बाधको व्रतमिति॥ व्रतमुपवासभिन्नमिति माधवः।
तत्रारुणोदयवेधो वैष्णवविषयः। तद्दशको वैष्णवग्रहणात्॥ परि-
शेषात्स्मार्तोदयवेधो वैष्णवभिन्नपरः॥ अत एव स्मार्तपदेन श्र-
वक्रियं ते ग्रंथेषु लववेधोपि विशेषदशमीकादशीत्यजेत॥ सरा-

याविंदुनास्पृष्टंगंगांभइतिनिर्मलं ॥ इतिविष्णुः ॥ अथवैष्णवलक्षणं
रा॰नि॰ भविष्ये ॥ यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा । तुल्येतेमम
६५ तेयस्तुसवैवैष्णवउच्यते ॥ तत्रशुक्लै[illegible]शीचतुर्द्धा ॥ अधिकेका काद
65 दशिका ॥ अधिकद्वादशिका ॥ उदयाधिका॰ उभयाधिकाचेति ॥ ए
वंविशुद्धापि ॥ शुद्धायामेकादश्यामाधिक्येऽह्नद्वयमः ॥ संपूर्णैकाद
शीयत्रप्रभातेपुनरेवसा ॥ लुप्यतेद्वादशीयत्रउपवासःकथंभवेत्
उपोष्यद्वितिथीतत्रविष्णुप्रीणनतत्परैः ॥ विष्णुप्रीणनपरावैष्णवाः ६५

नदितरस्मार्त्ताक्रमितत् ॥ स्कांदे ॥ प्रथमेह्नि संपूर्णा व्याप्याहोरात्रसं
युता ॥ द्वादश्यांतुनयातानहन्यतेपुनरेवसापूर्वाकार्यागृहस्थैश्च
यतिभिश्चोत्तराविभो ॥ एतच्चपरेद्युर्द्वादश्यभावविषयं ॥ गारुडेपि
पुनः प्रभातसमयेघटिकैकायदाभवेत ॥ तत्रोपवासोविहितोवन
स्थस्ययतेस्तथा ॥ विधवायाश्चतत्रैवपरतोद्वादशीनचेदिति ॥ शु
द्धायाद्वादशीमात्राधिकेतुनारदः ॥ नचेदेकादशीविष्णोर्द्वादशीपर
तः स्थिता ॥ उपोष्यैकादशीतत्रयदीच्छेत्परमंपदमिति ॥ विष्णोर्द्वा

ग॰नि॰ दशम्यां विद्धैकादश्याधिके चेत्तु प्रचेतनः ॥ एकादशी विहद्धा चेच्छुक्लेकृ
६६ ष्णेविशेषतः ॥ उत्तरांतुपरांतिः कुर्यात् ॥ पूर्वामुपवसेन्नहीति ॥ स्कांदे

दशमात्रविद्धायां द्वादश्यधिके तु परे युस्तपवास इति विद्धा चेत ॥ सं
पूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ सर्वैरेवोनरा कार्या परतो द्वाद
शी यदीति ॥ यत्तु हेमाद्रौ पाद्मे ॥ विद्धाप्यविद्धा विज्ञेया परतो द्वादशी
नचेत ॥ अविद्धापिच विद्धास्यात्परतो द्वादशी यदीति ॥ तदुभयपा पु
रविद्धाज्ञेयं ॥ अत्र भयाधिके चेत्तु संदेह एव उभयाधिके चेत्तु शुद्धा विद्धा

चसर्वैपरैश्चकार्येति॥आसः॥एकादशीयदालुप्तापरतोद्वादशी
भवेत्॥उपोष्याद्वादशीतत्रयदीच्छेत्परमांगतिं॥माधवतंत्रे॥लो मिति
पपदस्यसूर्योदयात्स्पर्शाभ्येऽवमेप्रसिद्धा॥सूर्योदयगतदशमी
विद्धायामेतद्वचनप्रवृत्तेः॥स्रुङ्न्यूनाधिकद्वादशिकायामुत्तर
दिनमुपवासः॥कार्यइति॥दिनत्रयेतुपुत्रवद्गृहस्थोपवासोन
कार्यः॥तदाहपितामहः॥एकादश्यांदिनत्रयेउपवासंकरोतियः
तस्यपुत्राविनश्यंतिमघायांपिंडतोयथा॥दिनत्रयेस्तुपाप्ते॥

रा॰नि॰
६७

द्धेतिष्ठ्यंतावेकवारेयस्मिन्तस्माद्दिनत्रयः॥ इति॥ दिनत्रयेनृपवा
सोनिषेधोयः॥ सनिराहारमेवं॥ वायवीये॥ उपवासनिषेधेतुभ
क्ष्यंकिंचित्प्रकल्पयेत॥ नदुष्यत्युपवासेनउपवासफलंलभेत॥ नक्तं पवा
नं हविष्यान्नमनोदनंवाफलंतिलैः क्षीरमथांबुपानं॥ यत्पंचग
व्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंच॥ इतिव्रतविशेषः॥
कौर्मे॥ संक्रांत्यांकृष्णपक्षेचरविशुक्रदिनेतथा॥ एकादश्यांनकुर्वी
तउपवासंचपारणं॥ तत्रापवादमाहविष्णुधर्मोत्तरे॥ भृगुभानुदि

नोपेता सूर्यसंक्रांतिसंयुता ॥ एकादशीमहोपोष्या पुत्रपौत्रप्रवर्द्धनी ।
ति ॥ स्मृत्यंतरे ॥ दशम्यादिमहीपालत्रिदिनं परिवर्जयेत् ॥ गंधतांबूल
पुष्पादिस्त्रीसंभोगं महायशाः ॥ कांस्ये ॥ कांस्यं मांसं मसूरान्नं तैलं चा
नृतभाषणं ॥ पुनर्भोजनमत्याशं दशम्यां परिवर्जयेत ॥ दशम्यामेक
भक्तं तु कामिकादशिकापरं ॥ सायमाद्यंतयोरह्नोः सायंप्रातः ॥
स्वमध्यमे ॥ उपवासफलप्रेप्सुर्जह्याद्भक्तचतुष्टयं ॥ स्वप्यनिमोप ।
वासी चेत्सायंप्रातर्भुक्तिक्रियां ॥ वर्जयेन्मतिमान्विप्रः संप्रामेह

रा·नि·
६८

रिवासरे॥इतिविष्णूक्तेः॥एकादश्यांप्रकुर्वीतनियमंचयथाविधिः
उपोष्यविष्णुपूजांचयथोक्तांसविधीयते॥सूतकादौवराहे।सूतके
चनरःस्नात्वाप्रणम्यमनसाहरिं॥एकादश्यांनभुंजीतव्रतमेवन।
लुप्यते॥मृतकेपिनभुंजीतएकादश्यांसदानरः॥इति॥स्त्रीणांरजो
दर्शनमाहमाधवीये ऋष्यशृंगः॥संप्रवृत्तेपिरजसिनत्याज्यं
द्वादशीव्रतं॥श्राद्धप्राप्तौ॥उपवासोयदानित्यः॥श्राद्धंनैमित्तकंय
दा।उपवासंतदाकुर्यादाघ्रायपितृपिंडकं॥अत्रोक्तोमार्कंडेयः।ए श्रा

68

कुभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन निर्द्वादशि
को भवेत्॥ व्रताकरणे प्रायश्चित्तस्मृतं नरो॥ अर्के पर्वद्वये रात्रौ चतुर्द
श्यष्टमी दिवा॥ एकादश्यां दिवारात्रौ भुक्त्वा चांद्रायणं चरेत्॥ अथ
चैत्रशुक्लैकादशी हरसंप्राहे॥ चैत्रमासस्य शुक्लायामेकादश्यां
तु वैष्णवैः॥ आंदोलनीयो लक्ष्मीशः॥ सलक्ष्मीको महोत्सवैः॥ द
मनेनार्चयित्वा तु रात्रौ जागरणं चरेदिति॥ दमनेन दमनपुष्पेणेति
ज्येष्ठशुक्लैकादशी निर्जला॥ ज्येष्ठमासि नृप श्रेष्ठ पाशुक्लैकादशी।

रा॰नि॰
६९

69

भवेत्॥ निर्जलं समुपोष्यात्र जलकुंभान्सशर्करान्॥ प्रदाय विप्रमुख्ये
भ्यो मोदते विष्णुसन्निधौ॥ इति स्कांदे॥ आषाढशुक्लैकादश्यां
विष्णुशयनं आह॥ एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः॥ भु
जंगशयने शेते॥ क्षीरार्णवजले सदा॥ विष्णुपुराणे॥ मद्धयनेमङ्स्या
नेमत्पार्श्वपरिवर्तनं॥ फलमूलजलाहारैः॥ हदिशाल्यमवार्पितमि
ति॥ अथ स्वापविधिर्भविष्ये॥ महापूजां ततः कुर्याद्देवदेवस्य चक्रि
णः॥ मालतीपुष्पमालाभिर्मंत्रेणानेन पूजयेत्॥ त्वयि सुप्ते जगन्ना॰

या। जगत्स्वमंभवेदिदं॥ विबुध्येचविबुध्येत॥ प्रसन्नोमेभवाच्युतेति

अथ।चातुर्मास्यव्रतारंभउक्तोभविष्ये॥ आषाढस्यसितेपक्षेएकादश्या

मुपोषितः॥ चातुर्मास्यव्रतंकुर्याद्यत्किंचिन्नियतोनरः॥ व्रतानामग्रेव

संति॥ चातुर्मास्यव्रतारंभस्यकालांतरमपिब्रह्मवैवर्ते॥ एकादश्यांतु

गृह्णीयात्संक्रांत्यांकर्कटस्यवा॥ आषाढ्यांवानरोभक्त्याचातुर्मास्य

व्रतक्रियामिति॥ व्रतग्रहणंयथा॥ वभाषेनाग्रतोविष्णोःकृतांजलि

पुटस्तथा॥ चतुरोवार्षिकान्मासान्देवस्योत्थापनाविधिः॥ उपंकरि

ष्येनियमंनिर्विघ्नंकुरुष्वमेच्युत॥ तदाभवंतुसंपूर्णास्त्वत्प्रसादाज्जनार्दनेति
रा.नि. अत्रप्रथमारंभकालेस्यान्न्वेनरस्य॥ श्रावणेवर्जयेच्छाकं॥ दधिभाद्र
७० पदेत्यजेत॥ दुग्धमाश्वयुजेमासिकार्तिकेद्विदलंत्यजेदिति॥ श्राव
70 णादिमासविशेषव्रतानन्नुष्ठानपर्यंतं॥ सष्टमासविशेषाख्याविहि
तंवर्जयेन्मल॥ इतिवचनात्॥ चातुर्मास्यव्रतानिमध्येतरामलमासे
ष्वनुवर्तंतएवेतिपरे॥ नित्यानामारंभः काम्यानांवर्जनमितियुक्तं
चं एकादश्यांपौर्णिमायांकर्कटसंक्रांत्यांवाआरंभेत॥ तत्रापि॥ २

आरब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णूक्तेः। आवणस्यशु
क्लैकादश्यांपापविनाशणमुक्तं॥ विष्णुरहस्ये॥ अतोदेवेतिमंत्रेणवि
ष्णोमूर्ध्निनिवेदयेत॥ अयंमंत्रंद्विजातीनांपवित्रारोपणेस्मृतः॥ भा
द्रस्यशुक्लैकादशीपार्श्वपरिवर्तनमुक्तं॥ भविष्योत्तरे॥ आश्रमेभाद्रपदेमा
सिएकादश्यांदिनेसिते॥ कटिदानंभवेद्विष्णोर्महापातकनाशनमि
ति॥ आश्विनस्यशुक्लैकादशीनत्रभविष्योक्तं॥ पुत्रप्राप्तिव्रतंविष्णुपू
जनंचद्वादशमासिकंव्रतमिदंप्रतापमार्तंडेधृतं॥ तत्रपुत्रप्रद्याभाग्य

णैस्त्रिभिः ॥ परिवृतः पुरुषो जायते किल ॥ ऋणत्रयाद्विमुच्येत पुरुषः
रा॰ नि॰ पुत्रदर्शनात् ॥ त्रिभिरिति देवपितृमनुष्यसंबंधिभिः ॥ अथ कार्त्तिकस्य
७२ शुक्लैकादश्यां देवोत्थापनमुक्तं ॥ पाद्मे ॥ एकादश्यां तु शुक्लायां कार्त्ति-
71 के मासि केशवं ॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः इति ॥ त-
द्विधिर्भविष्ये ॥ तथैव देवदेवस्य स्नानपूर्वं महोत्सवेन ॥ महापूजां ना-
तः कृत्वा देवमुत्थापयेत्सुधीः ॥ रामार्चनचंद्रिकायां ॥ इदं विष्णुर-
नेनांबुतल्पादुत्थापयेत्प्रभुं ॥ तथा च पौराणमंत्राः ॥ वाराहे ॥ ब्रह्मेंद्ररु-

द्राग्निकुवेरसूर्यसोमादिभिर्वंदितवंदनीयः॥ बुध्यस्वदेवेशजगन्निवा
स मंत्रप्रभावेनसुखेनदेव॥ इदंचद्वादशीचदेवप्रवोधनार्थंविनिर्मितः
त्वयैवसर्वलोकानांहितार्थंशेषशायिना॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनि
द्रांजगत्पते॥ त्वयाचोत्थाप्यमानेन॥ उत्थितंभुवनत्रयं॥ त्वयिसुप्तेजग
न्नाथजगत्सुप्तंभवेदिदं॥ उत्थितेचेष्टतेसर्वमुत्तिष्ठोत्तिष्ठमाधव॥ ततः
पुष्पांजलिमंत्रः॥ गतामेघावियच्चैवनिर्मलंनिर्मलादिशः॥ शारदानि
चपुष्पाणिगृहाणममकेशव॥ ततोविसृज्यव्रतंसमापयेत॥ मंत्रस्तु

रा॰नि॰
७२
72

निर्णयामृते॥ इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो॥ न्यूनंसंपूर्णतांया
तुत्वत्प्रसादाज्जनार्दनेति॥ यच्चवाराहे॥ आषाढमासेद्वादश्यांसर्व
शांतिकरंशुभं॥ इत्यादिनाद्वादश्यांशयनादिकमुक्तंतन्मिथुनार्के॥
एवंभविष्ये॥ आभाकाद्येषुमासेषुमिथुनेमाधवस्यच॥ द्वादश्यां॥
शुक्लपक्षेचप्रस्वपावर्तनोत्सवाः॥ आभाकासितपक्षेषुमैत्रश्रवण
रेवती॥ आदिमध्यावसानेषुप्रस्वापावर्तनोत्सवाः॥ रेवतीमत्रषष्ठी
लोपः उत्सवोजागरः॥ हेमाद्रौनारदीयेपि॥ मैत्रादिपादेस्वपितीह॥

विष्णुर्वेष्ठसमध्ये परिवर्तते च ॥ पोष्यावसाने च सुरारिहंता मबुध्य

तेमाँचतुष्टयेन ॥ एषां नक्षत्राणां विंशतिघटिकात्मकस्चरणोत्र

विज्ञेयः ॥ वस्तुतोत्र मैत्रादिषु शयनादिकं भवतीतितद्योग ॥ स्त्राभा

कामिनपत्नैकादशीव्रतपारणं निषिद्धमिति वोढं ॥ मात्स्ये ॥ निशि

स्वापो दिवोत्थानं संध्यायां परिवर्तनमिति ॥ निद्रादौ नक्षत्रपादयो

गानामभावेन तत्र योगोपि ग्राह्यः ॥ मेषादिमिथुनांतेषु यदा दशांछ

यं भवेत् ॥ श्रद्धांतरे तदा कृपं मिथुनार्कं हरीस्वपेन् कर्कादि

केवापियदादर्शाद्वयंभवेत॥ अर्द्धांतरेतदावज्ञपं कर्कटार्कद्वादिश्वरो-
रा॰नि॰ दिति॥ वाराहमिहिरोक्तेः॥ मार्गशीर्षशुक्लैकादश्यामारभ्यभविष्यो-
७२ त्तरोक्तंव्रतमवेद्द्वादश्यामासिकमुक्तं॥ तदंतेव्रतोद्यापनंकार्यं॥ फ-
लंचयमलोकादर्शनंस्वर्गलोकप्राप्तिश्चेति॥ पौषशुक्लैकादशीमा-
चमन्वादिस्तत्रदानश्राद्धादावनंतंफलमुक्तमिति॥ माघशुक्लैकादशीष-
ट्तिलातत्फलं॥ तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी॥ तिल-
भुक्तिलदाताचषं॥ तिलानामसीदति॥ सकृत्तुषट्तिलीभूत्वास-

र्वपापैः प्रमुच्यते ।। विंशद्वर्षसहस्राणि स्वर्गलोके महीयतीति । विष्णु
धर्मोत्तरे ।। तथा माघशुक्लैकादशी । भैमा निगमसिद्धा कल्पादिश्च मत्स्य
पुराणे । यद्यष्टम्यां चतुर्दश्यां द्वादश्यामथ भारत । अन्येष्वपि दिनर्क्षेषु
न शक्तः स्याद्उपोषितुं । ततः पुण्यामिमां भीमैर्माघस्यैकादशीं सितां उ
पोष्य सर्वपापघ्नीं गच्छेद्विष्णोः परं पदमिति । अस्याः पारणाहेऽपि षट्
तिलाचारमुक्तं विष्णुधर्मोत्तरे द्वादश्यां षट्तिलाचारं कृत्वा पापैः प्रमु
च्यते इति । फाल्गुनशुक्लैकादशी साचामर्दकी स्मुच्यते ।। भविष्योत्तरे ।।

गत्वागिरौवनेवापियत्रसालभ्यतेशिवा

फाल्गुणस्यासितेपक्षेएकादश्यामुपोषितः ॥ क्षीरोदेमथ्यमानेतुय

ग.नि. दाष्टतःसमुत्थितः । ग्रामर्दोदेवदेत्यानांतेनसामर्दकीस्मृताततग

७४ त्वाहरिपूजेयोहृष्टनमूलेयवाशिवा ॥ पूज्यापुष्पैःशुभैराज्ञोकार्यंजागरणं २

75 नरैः ॥ त्रयशाधिकशीतिः ॥ कार्यफलैरस्याप्रदक्षिणं ॥ मुच्यंतेदेहिनःपापैः

वाड्मनःकायसंभवैः ॥ देहांतरेनराः ॥ सर्वेपूज्यंतेविष्णुमंदिरमिति ।

तथा ॥ फाल्गुणेमासिशुक्लायामेकादश्यांजनार्दनः ॥ वसत्यामलकी

वृक्षेलक्ष्म्यासहजगत्पतिः ॥ ततःसंपूज्यदेवेशंशक्त्याकुर्यात्प्रदक्षिणं

उपोष्यविधिवत्कल्पंविष्णुलोकेमहीयतेसामर्दकी ॥ इत्येकादशी । अथ
द्वादशी ॥ सापूर्वविद्धाग्राह्यायुग्मवाक्यात् । एकादशीव्रतपारणंस्मृत्यंत
रे । कलाद्वयंत्रयंवापिद्वादशीनत्वतिक्रमेत् ॥ पारणेमरणेनृणांतिथि
स्तात्कालिकीस्मृता ॥ स्कांदे । यदाभवेदतीवल्पाद्वादशीपारणादिने । उषः
कालेद्वयंकुर्यात्प्रातर्मध्याह्निकंचतत् ॥ देवलः । संकटेविषमेप्राप्ते ।
द्वादश्यांपारयेत्कथं ॥ अद्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृत् ॥ सं
कटेत्रयोदशीनिमित्तकंकर्म । सर्वथाद्वादश्यभावेवोक्तंनारदीये ॥

ग॰नि॰
७५
75

त्रयोदश्यांतुशुक्लायांपारणंपृथिवीफलं॥शतयज्ञाधिकंवापिनरः
प्राप्नोत्यसंशयमिति॥अत्रहरिवासरस्व(रू)पंतद्वर्जनंचोक्तंविष्णुध
र्मोत्तरे॥द्वादश्याःप्रथमःपादोहरिवासरसंज्ञिकः॥अतिक्रम्यतुक
र्तव्यंपारणंविष्णुतत्परैरिति॥चैत्रशुक्लद्वादश्यांदमनकारोपणंतद्य
था॥पूर्वदिनाधिवासितंदमनकंपूर्वोदलयुतंजलंगृहीत्वा॥देवदेवज
गन्नाथवांछितार्थप्रदायकः॥हृदिस्थान्पूरकान्कामान्ममकामेश्व
रीप्रियः॥इदंदमनकंदेवगृहाणमदनुग्रहात्॥इमांसंवत्सरींपूजांभ

चं

गवन्परिपूजयेति ॥ वनमाला यथा देवकौस्तुभं सततं हरिः ॥ तद्वद्म
नकीमालां पूजां द्वदेववद्म श्रावणा शुक्ला द्वादश्यां पवित्रारोपणमु
क्तं रामार्चनचंद्रिकायां ॥ श्रावणस्य सिते पक्षे द्वादश्यां शौनकादिभिः ॥ उ
क्तः सदा प्रकर्तव्यः पवित्रारोपणोत्सवः ॥ पद्मे ॥ उन्नेत्रं तमधो दोलाश्र
वणो तत्र तु पूजनं ॥ चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः इति ॥ अथ देवक
र्विधानगंधसूत्रसमुद्भवं ॥ वितस्तिमात्रकं दोरं ॥ बध्नीयान्मंगलात्म
कं ॥ संवत्सरकृता पूजा संपूर्णफलदास्तु मे ॥ पवित्रारोपणे चैव सा।

गा॰नि॰
७६

76

त्रिधंकुरुतेनेनमः। विष्णुतेजोद्भवंरम्यंसर्वपातकनाशनं॥ सर्वपापघ्न ध्न
देदेवंनवांगेधारयाम्यहं॥ इतिमंत्रः॥ भाद्रशुक्लाद्वादशीश्रवणद्वादशी
साचैकादशीयुताशस्ता॥ हेमाद्रौमात्स्ये॥ द्वादशीश्रवणस्पृष्टास्पृशेदेका
दशीयदि॥ सएववैष्णवोयोगोविष्णुशृंखलसंज्ञितः॥ तस्मिन्नुपोष्यविधि
वन्नरः॥ संक्षीणकल्मषः॥ प्राप्नोत्यनुत्तमांसिद्धिंपुनरावर्तिदुर्लभामिति
द्वादश्यांश्रवणाभावेतु। नारदीये॥ यदानप्राप्यतेऋक्षंद्वादश्यांवैष्णवंक्व
चित्॥ एकादशीनदापोष्यापापघ्नीश्रवणान्वितेति॥ द्वादश्यांश्रवणयो

गेतुभविष्ये ॥ एकादशीमुपोष्यैवद्वादशीसमुपोषयेत् । नचात्रविधिलोपः
स्यादुभयोर्दैवतंहरिरिति ॥ विधिलोपएकादशीपारणहानिःकृतः ॥
यत्राकौतुमात्स्ये ॥ द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंयदि ॥ उपोष्यैकाद
शीतत्रद्वादश्यांपूजयेद्धरिमिति ॥ कृत्यमुक्तंभविष्योत्तरे ॥ मासिभाद्रपदे
शुक्लाद्वादशीश्रवणान्विता ॥ सर्वकामप्रदापुण्याउपवासेमहाफलं ॥ सं
वंदधौदिनंग्रास्तमुपवासोयदाभवेत् । पारणंतुनकर्तव्यंयावन्नैकमसं
लयइति ॥ अत्रबराणासंगमेस्नानंलैंगे ॥ अतःपरंतुसंसेव्यंगंगावरसंग

मं श्रवणद्वादशीयोगेबुधवारोयदाभवेत॥तदातस्मिन्नरःस्नात्वापापं

दा·नि· हित्वाफलंलभेदिति॥कार्तिकशुक्लावत्सद्वादशीसापूर्वविद्धाग्राह्यायु

७७ गमवाक्यात॥वत्सपूजावटश्चैवकर्तव्याप्रथमेहनि॥भविष्ये॥सवत्सांतु

77 ल्यवर्णांचसुशीलिनींगांपयस्विनीं॥चंदनादिभिरालिप्यपुष्पमालाभि

रर्चयेत॥अर्घ्यंताम्रमयेपात्रेकृत्वापुष्पाक्षतैस्तिलैः॥पादमूलेतुदद्यादि

मंत्रेणानेनपांडव॥क्षीरोदार्णवसंभूतेसुरासुरनमस्कृते॥सर्वदेवमये

मात॥गृहाणार्घ्यंनमोनमः॥ततोमाषवटकान्निवेदयेत॥सुरभित्वंजग

न्मानर्द्देविविष्णुपदेस्थिते ॥ सर्वदेवमये ग्रामं मयादत्तमिमं ग्रस ॥ ततः
प्रार्थयेत ॥ धेनोसर्वमयेदेवि सर्वदेवैरलंकृते ॥ मानर्ममाभिलषितंसफ
लंकुरुनंदिनि ॥ तत्रैव ॥ तद्दिने तैलपक्कं चस्थालीपाकंयुधिष्ठिरः ॥ गो
क्षीरंगोघृतंचैव दधितक्रंचवर्जयेदिति ॥ अथसर्वद्वादशीकृत्यं ॥ कात्याय
नः ॥ प्रातःस्नात्वाहरिंपूज्य उपवासंसमर्पयेत ॥ अज्ञानतिमिरांधस्य ॥ व्र
तेनानेनकेशव ॥ प्रसीदसमुखोभूत्वाज्ञानदृष्टिप्रदोभवेति ॥ ब्राह्मणा
नभोजयेद्भक्त्याप्रदद्याद्दक्षिणांतथा ॥ ततः स्वबंधुभिःसार्द्धंनारायणः

पराय

रा.नि.
७८
78

कृतपंचमहायज्ञः स्वयं भुंजीत वाग्यतः ॥ इति ॥ तत्र विशेषः स्कांदे ॥ कृ
त्वा चैवोपवासं च यो भुंक्ते द्वादशी दिने ॥ नैवेद्यं तुलसीमिश्रं हत्याकोटि
विनाशनं ॥ इति ॥ तत्र वर्ज्यानि गुरुः ॥ दिवानिद्रा परान्नं च पुनर्भोजनमै
थुने ॥ क्षौद्रं मांसामिषं तैलं द्वादश्यामष्ट वर्जयेत ॥ तथा ॥ कांस्यं मांसं म
सूरान्नं चणकं कोरदूषकं ॥ शाकं मधु परान्नं च हन्युरष्टाविमे फलं ॥ तथा
कांस्यं मांसं मसूरान्नं च ॥ इत्यादिकं काम्य ॥ व्रतपरं ॥ पाद्मे ॥ यदि भवा
न्निचाल्पा तु द्वादशी लंघिता नरैः ॥ करोति धर्महरणमस्नातेव सरस्वती

पारणादिने उषः काले द्वयं कुर्यात्प्रातर्मध्याह्निकं तदा महाहानि
कराह्येषा द्वादशी

भूयस्त्वामपिह्रादश्यांमध्याह्निकापकर्षोभवत्येव ॥ सर्वेषामुपवासानां

प्रातरेवहिपारणमित्युक्तेः इतिमन्वादश्यां निर्णयः ॥ अथ त्रयोदशीमा

सस्यशुक्लापूर्वाकृष्णोत्तरायाह्या ॥ शुक्लत्रयोदशीपूर्वापराकृष्णा ॥ त्रयोद

शीतिमाधवोक्तेः ॥ अथप्रदोषव्रतंब्रह्मोत्तरखंडे ॥ पक्षद्वयेत्रयोदश्यां

निराहारोभवेद्दिवा ॥ घटिकात्रयमस्तमयात्पूर्वंस्नानंसमाचरेत् ॥ शुक्लां

बरधरोभूत्वावाग्यतोनियमान्वितः ॥ कृतसंध्याजपविधिः शिवपूजां

समारभेदिति ॥ अत्रप्रदोषव्यापिनीग्राह्यादिनद्वयेचेत्पूर्वैव ॥ उभं

शानि॰ ७९ नुः ॥ त्रयोदशीप्रकर्तव्याद्वादशीसहितामुने ॥ मंदवारेप्रदोषोयंप्रशा-
न्तःसर्वदेहिनां ॥ तत्रापिदुर्लभस्तस्मिँकृष्णपक्षेमासेगतइति ॥ अत्रस्कं-
देपिदेव्युवाच ॥ देवकेनविधानेनप्रदोषव्रतमुत्तमं ॥ विधातव्यंनरैःस्त्री-
भिः ॥ संतानफलसिद्धये ॥ शिवउवाच ॥ यदात्रयोदशीशुक्लामंदवारे-
णसंयुतातत्रारभ्यव्रतंयत्रसंतानफलसिद्धये ॥ अत्रयाकाचित्रयोद-
शीशुक्लामंदवारयुक्ताप्रदोषव्यापिनीस्यात्तस्यामारभ्यवर्षपर्यंतंप्र-
तित्रयोदश्यांपुत्रकामनयानक्तव्रतंकुर्यात् ॥ तत्रप्रदोषेमौनंधृत्वावेदो-

ॐमंत्रैःशिवंसंपूज्यप्रार्थयेत॥ भवायभवनाशायमहादेवायधीमते॥
रुद्रायनीलकंठायशर्वायशशिमौलिने। उग्रायोघनाशायभीमाय ग्रा
भयहारिणे। ईशानायनमस्तुभ्यंपशूनांपतयेनमः। यथाभवान्समस्ता
नांपशूनांपाशमोचकः। तथाऽनेनसंतुष्टःपुत्रंदेहिसुलक्षणं। संपाव
कंचनैवेद्यंसाज्यंसफलशर्करं॥ दत्वाथोमुखवासंचताम्बूलंक्रमुकादिकं
समर्प्याष्टाष्टदत्वाष्टदीपानाज्यपरिप्लुतान्। भवाद्यैर्नामभिर्दत्वातैरेवा
ष्टप्रदक्षिणं॥ नमस्काराष्टकंदत्वावृषभंचापिपूजयेत्। निवेद्यकमे

कोटिसूर्यग्रहैः समा शुभयोगसमायुक्ता शनौ शततभिषा यदि
महामाघे त्रिविख्याता ॥ त्रि:

गा॰नि॰
८०
जातं न दद्याद्विनानुसारिनः ॥ दक्षिणां ब्राह्मणेभ्यस्ततो मोनं विसर्जयेत
इति त्रयोदश्यां श्राद्धनिषेधापवादः ॥ अथ कृष्णत्रयोदशी नित्यं सा वारुणयोगे
माह ॥ स्कांदे ॥ वरुणेन च संयुक्ता मघोक्ता सा त्रयोदशी ॥ गंगायां यदि लभे
त् कोटिकुलमुद्धरेत ॥ कुलं पुरुष इति ॥ अस्मिन कृष्णत्रयोदश्यां श्राद्धमाह
पितृगाथा ॥ अपि गजच्छायायामाह स्मृतिः ॥ कल्पतेत्रयोदश्यां मघा
स्विंदुः करे रविः ॥ यदा न दागजच्छायाश्राद्धे पुण्यैरवाप्यते ॥ मघायां
पिंडदानेन ज्येष्ठः पुत्रो विनश्यति ॥ कनीयांस्तु त्रयोदश्यां छायादस्मु
आपिनः स कुले जायाघोनद्धात्रयोदशी पायसं मधुसर्पि
ष्पां वर्षासु च मघासु चेति

दयाहृते॥ इतिश्रवणापिंडकंश्राद्धंकार्यं॥ शातातपः॥ पिंडनिर्वापर

हितंयत्तुश्राद्धंविधीयते। स्वधावाचनलोपोत्रविकिरस्तुनलुप्यते॥

अक्षय्यदक्षिणांस्वस्तिसौमनस्यंयथास्त्विति प्रसंगायुक्तं॥ अथका

र्त्तिककृष्णत्रयोदशीनस्यांदीपदानमुक्तंचंद्रप्रकाशेकार्त्तिकस्यासि

तपक्षेत्रयोदश्यांनिशामुखे॥ यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति

ति॥ इति॥ मंत्रस्तु॥ मृत्युनापाशदंडाभ्यांकालेनश्यामयासह॥ त्रयो

दशीदीपदानात्सूर्यजः प्रीयतांमम॥ श्यामयापमुनाया॥ पाद्मे॥

यमपंचकमासाद्य यत्कर्तव्यं निबोधमे॥ यमुनायां नरः श्रेष्ठः मथुरा-
यां विशेषतः॥ यमपंचकं त्रयोदश्यादितिथिपंचकमित्यर्थः॥ अत्र पं-
चतिथिषु यमतर्पणं कार्यं॥ तच्च सव्येन कर्तव्यं दक्षिणाभिमुखो नरः
यमस्य नाम मन्त्राभ्यां नरकस्य निवारणमिति॥ इति त्रयोदशी निर्णयः

अथ चतुर्दशी॥ सा पूर्वा शुक्ला कृष्णा नरकाख्या युगमवाक्यात्॥ सर्वा-
सु चतुर्दशीषु वीरेश्वरपूजोक्ता॥ स्कांदे॥ विधायैवं जागरणं नरो वीरे-
श्वरे वै येन॥ भूतायां नैवगृह्णाति शरीरं पंचभौतिकं॥ चैत्रकृष्णचतु-

रा॰नि॰
८२

81

वा

दंस्त्वा संपुटं संविधाय च ॥ केदारोदकपानेन यथा तत्र फलं लभेदिति
केदारकुंडोदकेनेति शेषः ॥ चैत्रशुक्लचतुर्दशी रात्रिव्यापिनी ग्रा

स्तु

ह्या ॥ मघाश्रावणमाससंज्ञा या चतुर्दशी ॥ सा रात्रिव्यापिनी ग्रा
ह्या परा पूर्वाह्णगामिनीति वचनात् ॥ निशि भ्रमंति भूतानि शक्तयः
शूलभृद्यतः ॥ अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेदिति ॥ ब्रह्म
वैवर्तात् ॥ वैशाखशुक्लचतुर्दशी नृसिंहजनयंती ॥ तद्रूपं ब्राह्मे ॥
शुक्लपक्षे चतुर्दश्यां मासि माधवसंज्ञके ॥ प्रादुर्भूतो नृसिंहोऽनत

ग॰नि॰
८२

82

स्नातांसमुपोषयेदिति॥ इयंप्रदोषव्यापिनीग्राह्यावैशाखस्यचतु
र्दश्यांसोमवारेनिलर्क्षके॥ अवतारोनृसिंहस्यप्रदोषसमयेद्विजा
इतिस्कांदात्॥ अनिलर्क्षंस्वातीदिनद्वये॥ प्रदोषव्याप्तावेकदेशस
मव्याप्तौचपरा॥ अत्रैवोंकारेश्वरयात्राउक्ताकाशीखंडे॥ राधशु
क्लचतुर्दश्यामद्यापितत्रवासिनः॥ तत्रयात्रांप्रकुर्वंतिमहोत्सव
पुरः॥ मया॥ तत्रजागरणंकृत्वाचतुर्दश्यामुपोषितः। प्राप्नुवंतिप
रंज्ञानंयत्रकुत्रापितेमृताः॥ ब्रह्मांडोदरमध्येतुयानितीर्थानिस

वेत ॥ मानिवेशाखभूतायामागमोक्तनिदर्शनादिति ॥ श्रावणशु-
क्लचतुर्दशीव्रतविधौरात्रिव्यापिनीग्राह्येति ॥ पूर्वमुक्तं ॥ अस्यांचतुर्द-
श्यां ॥ प्रतापमार्तंडेनदेवीपुराणोक्तं ॥ देवैपवित्रारोपणंकार्यं ॥ अत्र-
सर्वव्रतयज्ञदानादिजन्यफलसमंफलंभवतीति ॥ भाद्रकृष्णचतुर्द-
शीभविष्योत्तरे ॥ भाद्रेमासेसितेपक्षेअघोराख्याचतुर्दशी ॥ तामुपो-
तृ ष्यनरोयातिशिवलोकमयंनन ॥ इति ॥ अथभाद्रशुक्लचतुर्दशीसा-
नंतचतुर्दशीत्युच्यते ॥ यथाभाद्रपदस्यांतेचतुर्दश्यांद्विजोत्तम ॥ पौ-

ए॰नि॰
८३
83

र्णमास्यां समायोगे व्रतं चानंतकं चरेदिति ॥ तच्चोदयव्यापिनी
ग्राह्या ॥ स्कांदे ॥ मुहूर्त्तमपि चेज्ज्ञद्रे पौर्णमास्यां चतुर्दशी ॥ संपूर्णां
तां विद्धि तस्यां पूजयेद्विष्णुमव्ययमिति ॥ तथा च तिथितत्वे ॥ ये
नोदये मुहूर्त्तोपि ग्राह्यानंतव्रते तिथिरिति ॥ इनः सूर्यः माधवा
प्येवं ॥ दिनद्वये उदयव्यापित्वे संपूर्णत्वात्पूर्वैवेति ॥ अत्र कृत्यमु
क्तं भविष्योत्तरे ॥ कृत्वा दर्भमयानंतं वारिधान्यां निवेश्य च ॥ पूज
येद्गंधपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥ चतुर्दशाफलैर्मूलैर्जलजैः

कुस्तुमेरपि ॥ यवगोधूमशालीनां चूर्णेन कृतमप्पं चतुर्दशं । पद्भवे-
नमेत् दद्याद्वंशजान्वितं ॥ स्वयमेवं न भुंजीत कोवद्धास्तु डोरकं ॥ चतुर्द-
शाग्रंथिसंयुतं कुंकुमेन विलेपितं ॥ स्वयमेवं न भुंजीत व्रतबद्धास्तु डोरकं
स्वविन्यस्तं विष्णुनामप्रतिग्रंथसमन्वितं ॥ चतुर्दशसूत्रमयं सूत्रं कर्पा-
समेव च ॥ तद्बंधनमंत्रस्तु पन्नाकरो ॥ अनंतसंसारमहासमुद्रे मग्नं हि
मामभ्युद्धर वासुदेव ॥ अनंतरूपे विनियोजयस्व ॥ अनंतरूपाय नमो-
नमस्ते ॥ अनंतडोरकं बध्वा भोक्तव्यं स्वस्तिमानसैरिति ॥ डोरकस्य

ए॰नि॰
८४
84

धारणं वर्षपर्यंतं ॥ एवं चतुर्दशवर्षपर्यंतं कृत्वा व्रतोद्यापनं कुर्यात् ॥
व्रतस्योद्यापनं हित्वा न व्रतस्य फलं लभेत ॥ तस्माद्यथोक्तं कुर्वीत वित्त
शाठ्यं विवर्जयेत ॥ एतद्व्रतफलं विष्णुलोकप्राप्तिरिति ॥ व्रतारंभोद्या गो
रंभोद्यापने शुद्धकाले स्यातामित्यनंतचतुर्दशी ॥ अथ कार्तिककृष्ण
चतुर्दशी नरकचतुर्दशी ॥ तत्र चंद्रोदये तैलाभ्यंगः कार्यः ॥ तदुक्तं
भविष्योत्तरे ॥ कार्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये ॥ तिलतैलेन क
र्तव्यं स्नानं नरकभीरुणेति ॥ इनः सूर्यः ॥ अत्र स्कांदे ॥ पूर्वविद्धा चतुर्द

अत एव भविष्ये कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये
अवश्यमेव कर्तव्यं स्नानं नरकभीरुणेति

त्र्यंकार्तिकस्यसितेपरे॥ परेप्रत्यूषसमयेस्नानंकुर्यान्नियतव्रतः॥ वस्तु
तस्तु॥ चंद्रोदयोमुख्यःकालःसूर्योदयोगौणः॥ उत्तरभावित्वात्॥ अ
तोभ्यंगेमुख्याचंद्रोदयव्यापिनी॥ दिनद्वयेतद्व्याप्तौपूर्वातद्व्याप्त्य
भावेपूर्वैवगौणकालेसत्वात्॥ तिथ्यादौचभवेद्यावान्ह्रासोवृद्धि
परेहनि। तावान्ग्राह्यःसपूर्वेद्युरदृष्टोपिस्वकर्मणीति॥ अतएववचं
द्रप्रकाशे॥ त्रयोदशीपराभामः॥ स्वयंपातिचतुर्दशी। रात्रिशेषे
त्वमावास्यातदाभ्यंगेत्रयोदशीति॥ आहितैलेलक्ष्मीर्जलेगंगादी

स॰नि॰
८५
85

पावल्यांचतुर्दश्यां॥ प्रातःस्नानंतुयःकुर्याद्यमलोकंनपश्यति॥ दीपा
वल्यांनिशित्रिदिनह्रस्वएवसंलग्नक्रमेणदीपमानायादीपावलीनाम्नं
वंधनीमित्यर्थः॥ अरुणोदयंतोत्ररिक्तायोस्नातियोनरः॥ तस्याब्दि
कभवोधर्मोनश्यत्येवनसंशयः॥ इति॥ अपामार्गमथोतुंबीप्रपुंनाट
मथापरं॥ भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै॥ मंत्रस्तुपाद्मे॥ सीता क
तालोष्टसमायुक्तंसकंटकदलान्वितं॥ हरपापमपामार्गभ्राम्यमा
णःपुनःपुनः॥ सीताहलपद्धतिम्लान्संबंधिलोष्टसमायुक्तोऽपामा

र्गः तुंबीमिति॥ अलाबुवल्लीप्रपुंनागमिति चक्रमर्दकं॥ भविष्योत्तरे

अपामार्गंभ्रामयित्वायेकुर्याद्यमतर्पणं॥ नरकायप्रदातव्योदीपः सं

पूज्यदेवता॥ इति॥ केमस्तके इत्यर्थः॥ भविष्ये॥ ततश्चतर्पणंकुर्यात्

यमराजस्यनामभिः॥ यमायधर्मराजायमृत्यवेचांतकायच॥ वैवस्व

तायकालायसर्वभूतक्षयायच॥ औडुंबरायदध्नायनीलायपरमेष्ठि

ष्ठिने॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः॥ चतुर्दशैतेमंत्रास्तु॥

प्रत्येकंचनमोन्विताः॥ एकैकस्यतिलैर्मिश्रान्दद्यात्रीनुदकांजलीन्

यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवा॥ देवत्वंचपितृत्वंचय
स्मात्सिद्धिरूपता॥ देवत्वपक्षेशुक्लैस्तिलैर्जीवत्पितृकैरपिकार्यं
ग॰नि॰ जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरिति॥ पाद्मे॥ अत्रचका
८६ ग्यस्नानंतरमप्युक्तंस्मृतिदर्पणे॥ चतुर्दशीयाश्वयुजेस्यकृष्णा
86 गा स्नानमत्रयुक्ताच॥ भवेत्प्रभाते॥ स्नानंसमभ्यंगमनैरस्तुकार्यंसुगंधि
तैलेनविभूतिकामैः॥ आश्वयुजस्यमुख्यंचंद्रमासस्यगौणंचांद्र
मासस्नानात्कार्तिकोज्ञेयः॥ ब्राह्मे॥ इषेभूतेचदर्शेचकार्तिकेप्रथमे

दिने॥ यदा स्वातिनदीम्भं गत्वा स्नानं कुर्याद्दिनोदये॥ इनः सूर्यः॥ पापै

रसंशयिनचतुर्दश्यां भोजयित्वा तपोधनान्॥ शैवं विप्रांस्तपपरान्॥

शिवलोके महीयते॥ दानं दत्वा तु तेभ्यश्च यमलोकं न गच्छति॥ तथा

माषपत्रसंग्रालेन भुक्त्वा तत्र दिने नरः॥ प्रेताख्यायां चतुर्दश्यां सर्व

पापैः प्रमुच्यत इति॥ कचिद्देशाचाराच्चतुर्दश्यां शाकभक्षणं कुर्वं

ति॥ ग्रंथांतरे तेयथा॥ मूलकं मुकवास्तुसरिशापंकालं च निवं ज

यां शालिं विंहिममोचिकां च पटुं कं शो लं दुं वीं तथा॥ भांडकी

स्तनिसंएकंशिवदिनेवादंतियेमानवाः॥ प्रेतत्वंचनयांतिकार्त्ति
कदिनेकृष्णेचभूतेतिथौजं॥ यांजयंतीपटुकंपटोलं॥ अत्ररात्रौभो
जनंपंचप्रेतोपाख्यानेनिषिद्धीकृतमिति॥ अतोद्दिमभविष्ये॥ भूता
ष्टम्योदिवाभुक्त्वारात्रौभुक्त्वाचपर्वणी॥ एकादश्यांदिवारात्रौभुक्त्वा
चांद्रायणंचरेदिति॥ वाक्यंप्रेतचतुर्दशीव्यतिरिक्तविषयकंवा
ध्यं॥ नक्तकाम्यनक्तभोजनंचभवत्येव॥ तथाचनिर्णयामृतेनक्तं
प्रेतचतुर्दश्यांयः॥ कुर्याच्छिवतुष्टये॥ ननक्त[illegible]तेनापिप्रा[illegible]

ष्वेतेषु एष मीहशमिति ॥ प्रदोषसमये दीयान्भक्त्यादयात्मनोरमान्

ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥ प्राकारोद्यानवापीषु प्रतो

लीषू दजेषु च ॥ मंदिरास्तुविचित्रासुहस्तिशालासुचैवहीति ॥ लैंगे

अत्र यदानुसंपूर्णा चतुर्दशी ॥ तस्यामेव दीपदानादिकं सर्वं कार्यं

यदातूभयदिने प्रदोषव्यापिनी चतुर्दश्यां दीपदानोल्काग्रहणं।

कुर्यादिति ॥ अत्रोल्काग्रहणमकरणे निंदावादमाह ॥ पाद्मे ॥ भू

ताहेयेन कुर्वीत उल्काग्रहणं चेतमः ॥ निराशाः पितरोयांति तस्य

शी तदा पूर्वदिने उषासि स्नानादिकं कार्यं परदिने माषपत्रादि

भोजनादि प्रदोषे चतुर्द॰

ग्रा·नि·
८८
88

पंचत्वात्सुदारुणामिति ॥ नरकानलविधिं त्वमासकरणोदर्शोपिप्यते । च
तुर्दश्यां यमदीपदानं मंत्रो यथा तत्रैव ॥ दत्तो दीपश्चतुर्दश्यां नरक
स्य तु पायवे ॥ चतुर्वर्तिप्रदीपोयं ॥ तस्मात्पापापनुत्तये । इति नरक
चतुर्दशी ॥ अथोर्जव्रतिनः सम्यगु[illegible]पनविधिं शृणु ॥ ऊर्जशुक्ल ध्या
चतुर्दश्यां कुर्यादुद्यापनं व्रती ॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां
शुभां ॥ तुलसीमूलदेशे तु सर्वतोभद्रमेव च । तस्योपरिष्टात्कलशं तं
पंचरत्नसमन्वितं ॥ पूजयेत्केशवं तत्र सौवर्णं गुर्वनुज्ञया ॥ रात्रौ जा

गणं कुर्यात् गीतवाद्यादिमंगलैः ॥ ततः पौर्णमास्यां वै सपत्नीकान
द्विजोत्तमान् ॥ त्रिंशन्मितान् सलक्ष्मीकान् वा स्वशक्त्या वा निमंत्रयेत् ॥ अतो
देवेति मंत्रेण जुहुयात् तिलपायसं ॥ ततो गां कपिलां दद्यात् पूजयेद्वि
धिवत् क्रतुमिति । पाद्मे काशीखंडे ॥ कार्तिके सितभूतायां विश्वेशं यो
या विलोकयेत् ॥ स्नात्वा मणिकर्णिकायां च न तस्य पुनरागतिरिति ॥ त
थाच ॥ मार्गशुक्लचतुर्दश्यां कपर्दीश्वरसन्निधौ ॥ स्नात्वा नत्रापि म
रणान्नैव पंचत्वमवाप्नुयुः ॥ इमां सांवत्सरीं यात्रां ये करिष्यंति मानवाः

रा॰नि॰
८९
89

तीर्थप्रतिग्रहाद्यत्पापान्निस्तारिष्यतितेनगाइति ॥ अथमाघकृष्णचतुर्द-
शीसाचरटंतीतिप्रसिद्धापमः ॥ माघेमासमसितेपक्षेरटंत्याख्याचतुर्द-
शी ॥ तस्यामुदकवेलायांस्नातोनावेक्षतेयमं ॥ वेलायामरुणोदयेतस्
र्थः ॥ तथाच माघेमासिरटंत्याप: किंचिदभ्युदितेरवौ ॥ ब्रह्मघ्नंवा-
सुरापंवाकंपतंतंपुनीमहेतिवाक्येरवावित्यत्रसामीप्येऽरुणोद-
याभ्यंतरेऽर्थः कंजलं ॥ अथशिवरात्रिः ॥ अवंतीखंडे ॥ माघफा-
ल्गुणयोर्मध्येयाकृष्णाचतुर्दशीशिवरात्रिस्तुसाख्याता सर्वपाप

निषूदनी ॥ तदनंतनिमं कामं च ॥ तथा ॥ यानि कान्यत्र लिंगानि ॥ च
राणि स्थावराणि च ॥ तं तु जन्मसहस्रेषु भ्रमनेनात्र संशय इति ॥ नैवे
वकरणेनिषष्मुतेर्नितं ॥ शिवं च पूजयित्वा यो जागर्ति च चतुर्दशीं ॥ मा
तुः पयोधररसं न पिबेत्स कदाचन ॥ मम भक्तस्तु यो देव शिवरात्रिमु
पोषितः ॥ गणात्वमक्षय्यं दिव्यमक्षयं शिवशासनं सर्वान्भुक्त्वा कामदायो भो
गान्मृतो भूयो न जायते ॥ इति ॥ नैवैव फलश्रुतेः कामं ॥ सत्पादिलिंडे
स्वयं च लिंगमभ्यर्च्य सोपवासः सजागरः ॥ अजानन्नपि निःपापो नि

रा॰नि॰
९०

षाद्दगणतोगत ॥ इति ॥ तत्रचतुर्दशीप्रदोषव्यापिनीग्राह्या ॥ नारद नि

संहितायां ॥ अर्द्धरात्रेयुतातत्रमाघकृष्णाचतुर्दशी शिवरात्रि शिवरात्रिव्रतं

तत्रवाजिमेधफलंलभेत ॥ स्कांदे ॥ महतामपिपापानांदृष्टैवनिःकृ

तिःपुरा ॥ नदृष्टाकुर्वतांपुंसांकृष्णयुक्तांनिशिशिवामितिकृष्णयोगस्य

निर्दिष्टाच ॥ स्मृत्यंतरेपि ॥ भवेद्यत्रत्रयोदश्यांभूतव्याप्तामहानिशा

शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति ॥ पूर्वेद्युर्वापरेद्युर्वामहानि

शाचतुर्दशी ॥ व्याप्तासादृश्यतेयस्यांतस्यांकुर्याद्व्रतंनरः ॥ दिनद्वयस्य

ना

निशीथव्याँ[illegible]वव्याप्तौपरैव। आदित्यास्तमयेकाले॥ अस्तिचेद्याचतुर्द
शी॥ तद्रात्रिःशिवरात्रिःस्यात्साभवेदुत्तमोत्तमेतिकामिकात्प्रदोषव्या
पिनीग्राह्या॥ शिवरात्रिचतुर्दशीरात्रौजागरणंयस्मात्तस्मात्तांसमुपो
षयेदिति॥ स्मृत्यंतराच्च। शिवरात्रिव्रतंयच्चएकमेवतिथौगतं॥ तस्मा
दुभययोगिन्यामाचरेत्तद्व्रतंव्रतीतिस्मृतिः। प्रदोषव्याप्त्याधिक्याच्च॥ पू
र्वेदिनएवप्रदोषनिशीथोभयव्याप्तौपूर्वैव। त्रयोदशीयदादेविदिन
भुक्तिप्रमाणतः॥ जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशीतिस्कां

दात्॥ परेद्युर्वत्ताह्वशीचेत्सैव॥ निशाद्वयेचतुर्दश्यांपूर्वान्मापरामु

ए॰नि॰ मेलेकामिकात्॥ यदादिनद्वयेप्रदोषेव्याप्तिस्तदापूर्वैव॥ अर्द्धरात्रात्पुर॰

८२ स्तात्त्वेन्नयायोगोयदाभवेत्॥ पूर्वविद्धैवकर्त्तव्याशिवरात्रिःशिवप्रि

91 येति॥ माधवे॥ यत्तु एतस्मादेववचनाद्दिनद्वयनिशीथव्याप्तौपूर्वैवेति

८ हेमाद्रिमतं॥ तन्न॥ एतस्यवचसउत्तरदिनेनिशीथव्याप्त्यभावेप्युप

पत्तेः॥ उत्तरदिनगप्रदोषनिशीथोभयव्याप्तौदिवारात्रव्रतमितिपू॰

र्वोक्तवचसः॥ संकल्पकालस्यचबाधयोगात्॥ माधवाचार्यस्तात ८२

चरणाश्चैवं वदंति ॥ अयमेव निर्णयः ॥ प्रतिमासशिवरात्रिष्वपि ॥ स्मार्ते
मार्गशिरमासि दीपोत्सवदिने तथा ॥ गृह्णीयान्माघमासे वा द्वादशीव
मुपोषयेदिति ॥ हेमाद्रौ ॥ चतुर्दश्याद्यमिदं कार्यं चतुर्दश्याद्यं कर्तनं मं शि
त्र वरात्रितं ॥ शुभमितं त्रैव स्कांदे ॥ माघकृष्णचतुर्दश्यां रविवारो यदा ति
भवेत् ॥ भौमो वाप्यथ वे द्देवि कर्तव्यं व्रतमुत्तमं ॥ शिवयोगस्य योगो
वेन भवेदुत्तमोत्तममिति ॥ अथ व्रतप्रयोगः ॥ अत्र सूर्यः सोम इति
पठेत् ॥ तथा च शिवरहस्ये ॥ मंत्रेणानेन गृह्णीयान्नियमं भक्तिमा

शि॰नि॰
९२
92

न्तरः ॥ सचमंत्रोयथा ॥ शिवरात्रिव्रतंह्येतत्करिष्येहंमहानले ॥ निर्वि
घ्नमस्तुमेवात्रत्वत्प्रसादाज्जगत्पते ॥ ततःप्रतिज्ञामपिकुर्यात् ॥ चतु
र्दश्यांनिराहारोभूत्वाशंभोपरेहनि ॥ भोक्ष्येहंभुक्तिमुक्त्यर्थंशरणंमे
भवेश्वरेतिप्रातःकृत्वारात्रौपूजांकुर्यात् ॥ तत्रक्रमः ॥ प्रथमयामे
शिवसन्निधौ । स्वस्तिवाचनन्यासादिकंविधायविशेषपूर्वकंशिवं
पूजयेत् । विशेषोयंपुराणांतरे ॥ दुग्धेनप्रथमेयामेस्नानंदध्नाद्वितीयके । यामेतृतीयेचाज्येनचतुर्थेमधुनासदेति ॥ ह्रौंईशानायनमः

इतिमंत्रेणदुग्धस्नानं ॥ तत्रैवार्घ्यमंत्रः ॥ शिवरात्रिव्रतं देवपूजाजप

परायणः ॥ करोमिविधिवद्दत्तंगृहाणार्घ्यंमहेश्वरः ॥ ततोगंधादि

भिः ॥ संपूज्यप्रथमंयामंनयेत् ॥ तत्प्रातंनन्तरयः स्नानंतत्कथाश्र

वणादिकं ॥ उपवासकृतोद्येनगुणाप्रोक्तामणीषिभिरिति ॥ देवीपु

राणे ॥ ततोद्वितीयेयामे ॥ ॐ ह्रीं अघोरायनमः ॥ इतिदध्नास्नानं ॥ त

त्रार्घ्यमंत्रः ॥ नमः शिवायशांतायसर्वपापहरायच ॥ शिवरात्रौद

दाम्यर्घ्यंप्रसीदउपयामहा ॥ ततस्तृतीयेयामे ॥ ॐ ह्रीं वामदेवायनमः

रा॰नि॰
९३
93

इति घृतेन स्नानं ॥ तत्रार्घ्यमंत्रः ॥ दुःखदारिद्र्यशोकानां हर्ता त्वं पार्व-
तीपते ॥ शिवरात्रौ ददाम्यर्घ्यमुमाकांत गृहाण मे ॥ ततस्तत्रार्घ्ये यामे
ॐ ह्रीं अघोनाथाय नमः ॥ इति मधुना स्नानं ॥ तत्रार्घ्यमंत्रः ॥ मया कृता-
न्यनेकानि पापानि हर त्वं शंकर ॥ शिवरात्रौ ददाम्यर्घ्यं गृहाण परमेश्व-
र ॥ ततः प्रभाते प्रार्थयेत ॥ अविघ्नेन व्रतं देव त्वत्प्रसादात्समर्पितं ॥ क्ष-
मस्व जगतां नाथ ॥ त्रैलोक्याधिपते हर ॥ इति पूजा ॥ भविष्ये ॥ माघमा-
से चतुर्दश्यां कृष्णपक्षे समाहितः ॥ कृत्तिवासेश्वरं लिंगमर्चयंति शुभं-

शिवं ॥ तेयांतिपरमंस्थानंसदाशिवमनामयमिति ॥ पारणमाहस्कां
दे ॥ उपोषणंचतुर्दश्यांपंचदश्यांतुपारणं ॥ कृतैःसुकृतलक्षैश्चलं
भतेवाप्यथवानवेति ॥ माधवीये ॥ ब्रह्मांडोदरमध्येतुयानितीर्थानिसं
तिवै ॥ संस्नातानिभवंतीहभूतायापारणेकृते ॥ तीर्थानामेवसर्वासा
मुपवासव्रतादिषु ॥ तिथ्यंतेपारणंकुर्याद्विनाशिवचतुर्दशीमिति
अतःशिवरात्रेःस्कांदे ॥ जन्माष्टमीजयंतीचशिवरात्रिस्तथैवच ॥
पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणमितिगौल्लेकालपरं ॥ सक्ता ८७

रा॰नि॰
६४

९५

लाद्भुतरोगेणःकालःसर्वस्यकर्मणः॥ इतित्रिकांडमदनोक्तेहेमाद्रौ
तिथ्यंतेचैवभांतेचपारणंयत्रचोच्यते॥ यामत्रयोर्ध्वगामिन्यांप्रातरेव
हिपारणं॥ इतिचतुर्दशीनिर्णयः॥ अथपूर्णिमा॥ सातुपूर्णचंद्रव्रतसा
वित्रीव्रतातिरिक्तासर्वापरैव॥ भूतविद्धानकर्तव्यादर्शःपूर्णाकदाचन॥
वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममिति॥ ब्रह्मवैवर्त्तेतु॥ सर्वा
सुपूर्णिमास्वमासु श्राद्धंनित्यंपितामहः॥ अमावास्याव्यतीपातपू
र्णिमाष्टकासुच॥ विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यते॥ इति॥ अ

ष्यचैत्रपूर्णिमायांविशेषोवायवीये॥संवत्सरंकृतनाचार्योमासफलेन
किलान्मुरान॥दमनेनार्चयेच्चैवविशेषेणसदाशिवमिति॥मेषस्थे
रवौयाऽ।मावास्यानदंतेचांद्रयापौर्णमासीसाचैत्री॥एतत्क्रमेण
मासाअपि॥तदुक्तंहारदत्तेन॥मेषादिस्थेसवितरियोयोदर्शः।प्रवर्तते
चांद्रमासास्तदंतेनाश्चैत्राद्याद्वादशस्मृताः॥तेषुयायापौर्णमासी
सासाचैत्रादिकास्मृता॥कदाचित्केनयुक्तेननक्षत्रस्येतिनिर्णयः
अथचैत्र्यांपांजाबालिः॥श्रुतान्नमुदकुंभंचवैशाख्यांचविशेष

रा॰नि॰
९५

95

तः निर्द्दिष्टयधर्मराजायगोदानफलमाप्नुयात् ॥ स्मृतमितिपद्मं ॥ आषा
ढीपूर्णिमानुकोकिलाव्रतक्रमेणशुभान्वितसंध्याकालव्यापिनी ।
ग्राह्या ॥ आषाढपौर्णमास्यांतुसंध्याकालेह्युपस्थिते ॥ संकल्पयेन्मा
समेकंश्रावणेऽथप्रत्यहंत्विदमिति ॥ भविष्योक्तेः ॥ अत्रैवव्यासपूजोक्ता
तत्रोदयिकीमुहूर्त्तंग्राह्याविघ्नेश्वरपद्धतौ । त्रिमुहूर्त्ताधिकंपुण्यंपर्व
णोरमयोरिति । अत्रैवाषाढेश्वरयात्रापूजाचोक्ताकाशीखंडे ॥ उदीच्या
राम भारभूतेमाषाढीत्रासमर्चयेत् । आषाढ्यांपंचदश्यांवैनपापैःपरिभू

प्यते॥कृत्वासांवत्सरीयात्रामनेनाजायतेनरः॥अनेनानिःपापः।अ

षाश्रावणीपूर्णिमापवित्रार्पणादौपूर्वविद्धाग्राह्यास्कांदे॥यांतिप

थिंसमनुप्राप्ययात्रांसंपत्सिनीपतिः।सातिथिस्तत्रहितेयाकात्रिमु

हूर्ताचयाभवेदिति॥अथोपाकर्म॥अध्यायानामुपाकर्मश्रावणं

न श्रवणेनवा॥हस्तेनौषधिभावेवापंचम्यांश्रावणस्यतु॥हस्तेनयुक्ता

यांपंचम्यामिति॥स्मृतिचंद्रिकायां॥दिनांतरेपिहस्तेनयुक्त।इतिहू

माद्रिः॥श्रवणश्रावण्योरिदमेवयुक्तं॥एवमेवस्मृतसारेपि उ

ओ

षधीनामप्रादुर्भावेतुबहृचकारियां॥ अध्यायानामुपाकर्मश्रावणं

गा॰नि॰ श्रवणेनैथवा॥ अहृष्टौषधयस्तस्मिन्मासेतु॥ तदाहस्तेघर्मः॥ श्राव

९६ णीदुर्गानवमीदूर्वाचैवहुतनाशिनी॥ पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्व

९८ लेर्दिनमितिवेधश्चत्रिमुहूर्तात्मिकोज्ञेयः॥ तदुक्तं॥ नभवंतिचेत्तदा धे

न भाद्रपदे॥ मासिश्रावणेनकरोतितिं॥ मदाकरग्रंथे॥ बहृचाःश्रवणं

ग्राह्यंपौर्णमासीयजुर्विदां॥ उपाकर्मादिकेकार्येहस्तोविसामवेदि

नः॥ अथर्ववेदिभिरपिश्रावणंग्राह्यमीरितमिति॥ भार्गवः॥ पर्वण्यो

के

दयिकं कुर्युः ॥ श्रावणी नैमित्तिकी यिकाः वक्रं चाः श्रावणी तो गुरुग्रहसंक्रांतिव

र्जितइति ॥ श्रावणी पौर्णमासी तु संगवात्परतो यदि तेद्वौदयिकी ग्राह्या

नान्यादौदयिकी भवेत् ॥ अन्यच्च ॥ श्रावण्यां पौर्णमास्यां श्रवणाकर्मेत्या

श्वलायनीयैः ॥ कार्यं तत्र प्रदोषव्यापिनी ग्राह्येति वक्रचगृह्येति ॥ अथ

सामगानामुपाकर्मणि द्वौ ॥ एकं सिंहार्के हस्ते ग्रासग्रंथपाठार्थमपरम

कराकैः ॥ हस्तेचारण्यपकरहस्यग्रंथपाठार्थमिति ॥ तथा चोत्सर्गकर्मणि

हुतस्वाह ॥ गार्ग्यः ॥ सिंहे रवौ तु पुष्पत्ते पूर्वान्हे विचरेद्बहिः ॥ सामगामिति

रा·नि·
६०

97

नाकुर्यदुत्सर्गं स्वस्वछंदसां ॥ शुक्लपक्षेनुदृष्टेन उपाकर्म पराह्णिकमिति ।

तत्राह गोभिलः । अपराह्णेषूपाकर्म पूर्वाह्णे तस्मात्तर्पणं ॥ कोद्युमाः मिलि

ताः । कुर्युः प्रातरौत्सर्गिकीं क्रियामिति ॥ अत्र नक्षत्रप्रधानत्वान्हस्त

स्य पूर्वाह्णेऽपराह्णश्च पुष्पस्य प्रातस्तु ग्राह्यः ॥ नवा मरीचिरिति ॥ ब्राह्मण

क्षत्रियविशामुपाकर्म प्रशस्तेन करोति यदा मोहाच्छंदोऽलत्वं हि जाय

ते ॥ संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यति ॥ देवानां सिद्धिकृतं हित

स्मात्सम्यक्समाचरेदिति ॥ छंदोगपरिशिष्टे ॥ अस्तमयं यदुपाकर्मसोत्सर्गं

विधिवद्द्विजैः॥क्रियतेछंदसांतेनपुनराप्यायनंभवेत्।अयातयामो॰
छंदोभिर्यत्कर्मक्रियतेद्विजैः॥क्रीडमानैरपिसदाततेषांसिद्धिकारकं
उत्सर्जनंतुवेदानामुपाकरणकर्मच॥अकृत्वावेदजाप्येनफलंनाप्नो
तिमानवः॥इतिउपाकर्मोत्सर्जनंचवनस्थानामपीष्यते॥धारणा॰
ध्ययनांगत्वागृहीणांब्रह्मचारिणामिति॥वायवीये॥उपाकर्मणिवि
येभ्योदद्यायज्ञोपवीतकः॥आयुष्मान्जायतेतेनकर्मणाजायतेभुवि
अत्ररक्षाबंधोनभद्रायांनकार्यः॥भद्रायांछिन्नकर्तेमेश्रावणीफाल्गु॰

रा॰नि॰
९८

98

नीनद्या ॥ श्रावणी नृपतिर्हंति । ग्रामं दहति फाल्गुनीति वचनात् ॥ भवि
ष्यपुराणे ॥ रक्षाबंधनमात्रस्यैव निषेधो न नृपावरणादेरपीति ॥ मनुग्रह
संक्रांति दुष्टेषु हस्तश्रवणपर्वसु ॥ उपाकर्म न कुर्वीत ऋग्यजुःसामपाठ
काः स्मृतियुः हार्णवे ॥ संक्रांतिग्रहणे वापि पौर्णमास्यां यदा भवेत्
उपाकृतिस्तु पंचम्यां कार्या वाजसनेयभिरिति ॥ वाजसनेयिपदं तैत्ति
रीयं च यजुर्वेदिपरं ॥ छंदोगपरिशिष्टे ॥ अर्द्धरात्रादधस्ताच्चेत्संक्रांति
ग्रहणं तदा ॥ उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति कात्याय

नः ॥ तर्हि मुख्यकालदुष्टत्वे कैः कदा कार्यमित्याह ॥ गार्ग्यः । यदि स्या
द्ब्रावणं कर्म ग्रहसंक्रांतिदूषितं । स्यादुपाकरणं शुक्ले पंचम्यां श्रावणे
ज्यै सुतु ॥ इत्यपजुर्वेदिभिस्तथा सामवेदिभिर्भाद्रस्य शुक्लपंचम्यां गौण
काले उपाकर्म कार्यं ॥ हस्तेनैवाथ पंचम्यां शुक्लायां भाद्रमासि चेति । सं
ग्रहे । गुरुभार्गवयोर्मौढ्ये बाले वा वृद्धके पि च ॥ प्रथमोपाकृतिर्यस्मात्कृ
तं कर्म विनाशकृत ॥ पराशरः । उपाकर्म तथोत्सर्गः ॥ प्रसवाहोत्सवाष्ट
काः ॥ मासमध्ये परे कार्या वर्जयित्वा तु पैतृकमिति परे नौ मासि । प्रसवा

रा॰नि॰
९९
99

होत्सवइतिजातेष्वादिः। अत्रनारदः॥ दीपोत्सवजनानांश्रावण्यां
चमहाष्टमी॥ अगस्त्यार्घ्यप्रदानेनसूतकंनैवविद्यते॥ इतिष्टसूतकपरं
त्वयसूतकस्तुनिषेधस्तदाह॥ त्वयसूतकसंयुक्तेपर्वणिस्यादुपक्रियाद्दुः
त्वेगोकामयग्रस्ताराष्ट्रेतस्मिन्द्विजातय॥ इति॥ नदीनांरजोदोषोपवाद
माहगार्ग्यः॥ उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच॥ चंद्रसूर्यग्रहेचै
वरजोदोषोनविद्यते॥ इत्युपाकर्मनिर्णयः॥ अथोत्सर्गकर्ममनुः॥ पुष्येतु
छंदसांकुर्याद्बहिरुत्सर्जनंद्विजः॥ माघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेहः

नीति ॥ यथाशास्त्रं कृत्वैवमुत्सर्गं छंदसां बहिः ॥ विरमेत्पक्षिणीं रात्रिं यद्वा
प्येकमहर्निशं ॥ ततऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत् ॥ वेदांगानि च स
र्वाणि कृष्णपक्षेषु वै पठेत् ॥ इत्यृग्यजुरथर्ववेदिनां ॥ सामगानां छंदोगपरि
शिष्टेनाधीयीत रहस्यानि नोत्तराणि विचक्षणः ॥ न चोपनिषदश्चैव षा
ण्मासाद्दक्षिणायनात् ॥ दक्षिणायनं ॥ यावदेषां रहस्यानां संख्यानिवृत्ति
रित्यर्थः ॥ ततश्च ॥ उपाकृत्योदगयने ॥ ततोधीयीत धर्मवित् ॥ उत्सर्गश्च
कण्वैषां तेष्वां प्रौष्ठपदे पि वा ॥ तैष्यामिति पौष्यां वा इमासत्वान्माघा

मावास्यायांवाभद्रपुष्येवारहस्यानामप्येवएवोत्सर्गः।स्यादितिमर्थः।खादि
रा॰नि॰ रगृह्ये॥पुष्येतूत्सर्जनंकुर्याडुपाकर्मदिनेतथा।प्रान्तरेववद्दिनत्रयविधि
रित्याह॥खादिरः इत्युत्सर्गकर्मनिर्णयः।अथकार्तिकपौर्णमास्यां
कार्तिकेयदर्शनमुक्तंकाशीखंडे॥कार्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वा
मिदर्शनं॥सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः॥इति॥अत्रान्यःभवि
ष्ये पौर्णमास्यांतुसंध्यायांकर्तव्यंत्रिपुरोत्सवः॥दद्यादनेनमंत्रेणप्रः
दीपान्सेवतालये।ॐकीटायतंगमशकाश्चवृक्षाःजलेस्थलेजलेयेविचरं

तिजिवाः। दृष्ट्वाप्रदीपंनहिजन्मभागिनोभवंतिमत्स्यश्वपचापिविप्राः
इतित्रिपुरोत्सवः॥ अथफाल्गुणपौर्णमास्यांहोलिकोत्सवः। भविष्ये
अथपंचदशीशुक्लाफाल्गुणस्यनराधिपः। अभयंचैवलोकानांदीप
तांपरमेश्वरः॥ यथायुद्धांकितालोकारमंतिचसदंतिच। दारुणानि
खंडानिगृहीत्वासमरोत्सुकाः। योधवत्सयविनिर्यांतुशिशवःसंप्र
हर्षिताः। संचयंशुष्ककाष्ठानामुपलानांचकारयेत्। तत्राग्निंविहुत्वा धिव
रक्षोघ्नैर्मंत्रविस्तरैः॥ ततःकिलकिलाशब्दैस्तालशब्दैर्मनोहरैः। तेन

शब्देनसापापामोहेनचनिराकृता॥साढुंढाराक्षसी॥तेनैव॥सर्वदुष्टा
पहोहोमः॥सर्वरोगोपशांतिदः॥क्रियतेस्यांद्विजैःपार्थतेनसा
होलिकास्मृतेति॥जमदग्निंपरिक्रम्यपायंतुचहृसंतुच॥जल्पंतः
स्वेच्छयालोकानिःशंकाययथाजन्मनः॥तत्रपूर्णिमाप्रदोषव्यापि
नीग्राह्या॥चंद्रप्रकाशेनारदः॥प्रतिपद्भूतभद्रासुयाविनाहोलिका
दिवा॥संवत्सरंचतद्राष्ट्रंपुरंदहतिसाद्भुतं॥इयंपूर्णिमादिनद्वयेप्रदो
षव्याप्तौपरैवदिनद्वयेनोचेत्तदापूर्वैवपरेवरात्रौभद्रांविहायकार्या

दिनार्द्धमतिनोयायास्याफाल्गुणीपूर्णिमायदि॥रात्रौभद्रावसानेतुहो
लिकांतत्रदीपयेदिति॥भद्रापुच्छेवादीपयेत॥लल्लः विष्टियांयानि
कर्माणिशुभानिअशुभानिच॥तानिसर्वाणिसिध्यंतिभद्रापुच्छेनसंश
य॥इति॥अत्रचंद्रग्रहणाख्येनदाहस्नात्वाकार्यमिति॥फाल्गुणेमलमा
सत्वेन॥शुद्धेमासिहोलिकादीपनःस्यादिति॥ततःपूजामंत्रः॥शि
शिरस्यांतकेदेविवसंतमदनप्रिये॥आगतासिविधानेन॥पूजायांह
रहोलिके॥ततः॥प्रज्वालनमंत्रः॥गतेतुषारसमयेवसंतस्यसमागमे

होलिकाज्वलनंकार्यान्मपुत्रहृयवांधवैः॥ इतिपूर्णिमानिर्णयः
अथामावास्या॥ सासर्वत्रस्नानव्रतादौउत्तराग्रुम्मवाक्यादिति॥ अथ
ज्येष्ठामावास्यावटसावित्रीव्रतमुच्यते॥ सापूर्वविद्धाग्राह्या॥ व्रतमेवैवर्तं
भूतविद्धानकर्तव्यादर्शपूर्णौकदाचन॥ वर्जयित्वामुनिश्रेष्ठसावि
त्रीव्रतमुत्तममिति॥ प्रतिपत्पंचमीभूतनवमीदशमीतथा॥ वट-
सावित्र्यमावास्यानोपोष्याःपरसंयुता॥ इतिस्कांदे॥ हृद्दन्तपाच-
हृत्तपाचरंभाचसावित्रीवटपैतृकी॥ कृष्णाष्टमीचभूताचकर्तव्या

